	कि.	ट. ख.
थक्कृत घण्टापथटीकेसहित	२	।
कुमारसंभव काव्य-कालिदासकृत, मल्लिनाथकृत (१-८ सर्ग) व सीतारामकृत (८-१७ सर्ग) संजीविनी टीकेसहित	२	।
कुवलयानंदकारिका-आशाधरकृत, स्वकृत अलंकारदीपिकाटीकेसहित	॥।	०=
कृष्णसहस्रनाम	०=	०॥
गणपतिस्तोत्र	०।	०॥
गणेशाष्टक	०।	०॥
गणेशगीता (साधी)	०=।	०॥
,, (रे. पु.)	।।	०॥
गणेशसहस्रनामावलि	०-॥	०॥
गोपालसहस्रनाम, गोपालकवच व गोपालस्तवराज यांसहित	०=।	०॥
,, (रेशमी पुठा)	।॥	०॥
चतुःश्लोकी भागवत	०।	०॥
जैनस्तोत्रसंग्रह (यांत भक्तामरस्तोत्र, कल्याणमंदिरस्तोत्र, एकीभावस्तोत्र, विषापहारस्तोत्र व जिनचतुर्विंशतिका इतकीं स्तोत्रें आहेत.)	।	०॥
ज्योतिर्लिंगस्तोत्र व शिवमानसपूजा	०॥	०॥
तर्ककौमुदी-लौगाक्षिभास्करकृत	०=	०॥
तर्कसंग्रह-अन्नंभट्टकृत, स्वकृत दीपिकाटीका, व इंग्रजी भाषांतर यांसहित	।=	०-
तुलसीमाहात्म्य ...	०॥	०॥
त्रिकालसंध्या हिरण्यकेशीया (आपस्तंबी)	०॥।	०॥
,, ऋग्वेदीया	०॥।	०॥
दत्तात्रेयसहस्रनामावलि	०=	०॥
दत्तात्रेयस्तोत्र	०।	०॥
दमयंतीकथा (नलचंपू)-त्रिविक्रमभट्टकृत, चण्डपालकृत विषमपदप्रकाश टीकेसहित	२	।
दशकुमारचरित-दण्डिकृत, पूर्वपीठिका, उत्तरपीठिका, कवीन्द्रसरस्वतीकृत पदचन्द्रिकाटीका, शिवरामकृत भूषणाटीका, लघुदीपिकाटीका (दशकुमारचरितावर) व पदचन्द्रिकाटीका (पूर्वपीठिकेवर) यांसहित	१॥	०=
दुर्गास्तोत्र-नारायणभट्ट पर्वणीकरकृत ...	०-	०॥
देवीसहस्रनामावलि	०-॥	०॥
द्वादशस्तोत्र-भगवत्पादाचार्यकृत	०-	०॥
धातुरूपावलि	०=	०॥
श्रीहर्षविरचित नैषधीयचरित-नैषधीयप्रकाशाख्य (नारायणी) टीकेसहित	६	॥-
नर्मदाष्टकस्तोत्र-शंकराचार्यकृत	०।	०॥
नारदभक्तिसूत्रें ...	०-	०॥
नीतिशतक-भर्तृहरिकृत, कृष्णशास्त्री महाबलकृत टीकेसहित ...	।	०॥

	कि.	ट. ख.
नीति-शृङ्गार-वैराग्य-श-तकें-भर्तृहरिकृत, कृ-ष्णाशास्त्री महाबल-कृत टीकेसहित ...	।।।	०/
पंचरत्नी गीता (यांत भ-गवद्गीता, विष्णुसह-स्रनाम, भीष्मस्तव-राज, अनुस्मृति व गजेंद्रमोक्ष इतकीं प्र-करणें आहेत.) (रे. पु.) (स्थूला-क्षर)...	१	०≡
,, ,, (मध्यमाक्षर)	।॥	०/
,, ,, (सूक्ष्माक्षर)	।≡	०/
,, (साधी)	।≥	०/
पांडवगीता	०/	०॥
पार्वतीपरिणय नाटक-बाणकृत	।.	०॥
प्रश्नोत्तरपयोनिधि-बळ-रामदासमुनिकृत ...	।.	०॥
प्रसन्नराघव नाटक-जय-देवकृत	।॥.	०/
प्रातःस्मरण	०/	०॥
पुरुषोत्तम सहस्रनाम...	०/	०॥
बृहत्स्तोत्ररत्नाकरः ...	।≡	०/
,, (कापडी)	॥=	०/
ब्रह्मनामावलि-शंकराचा-र्यकृत	०।	०॥
श्रीमद्भागवत मूळ (रे-शमी गुटका) ...	१॥	०≡॥
भगवद्गीता (रेशमी पुठ्ठा स्थूलाक्षर)	।॥.	०≥॥
,, (मध्यमाक्षर रे. पु.)	।≥	०॥
,, ,, (सूक्ष्माक्षर)	।/	०॥
साधी (मध्यमाक्षर) ...	०≡	०॥
,, बुकसाईज (म. अ.)	०≡	०॥
,, शंकरानंदसरस्वती-कृत गीतातात्पर्यबो-		

	कि.	ट. ख.
धिनीटीकेसहित ...		
भट्टिकाव्य-भट्टिकृत, ज-यमङ्गलकृत जयमङ्ग-ला टीकेसहित ...		
भट्टिकाव्याचा १४ वा व १५ वा सर्ग इंग्रजी टीपांसहित- प्रत्येक स-र्गास		
पंडितराज जगन्नाथ वि-रचित भामिनीविला-स काव्य अच्युतराव मोडककृत प्रणयप्र-काश टीकेसहित. ...		
मनुस्मृति-कुल्लूकभट्टकृत मन्वर्थमुक्तावलि टीके-सहित...		
महालक्ष्म्यष्टक		
महावीरचरितनाटक-भ-वभूतिकृत, वीरराघव-कृत टीकेसहित ...		
मालतीमाधव नाटक-भ-वभूतिकृत, त्रिपुरारि-कृत टीका, नान्यदेव-कृत टीका व जगद्धर-कृत टीका यांसहित		
मालविकाग्निमित्र ना-टक-कालिदासकृत, काटयवेमकृत टीकेसहित		
मालविकाग्निमित्र ना-टक-इंग्रजी टीपांस-हित		
विशाखदत्त विरचित मु-द्राराक्षस नाटक धु-डिराजकृत टीकेसहित	१॥	
मेघदूत काव्य-कालिदा-सकृत, मल्लिनाथकृत संजीविनी टीकेसहित	।:	

श्रीः

भर्तृहरिविरचितं

नीतिशतकम् ।

महाबलोपाह्वकृष्णशास्त्रिविरचितया

व्याख्यया समलंकृतम् ।

द्वितीयं संस्करणम् ।

तच्च

मुंबय्यां

निर्णयसागरमुद्रणालयाधिपतिना स्वकीयमुद्रणालये

मुद्रयित्वा प्रसिद्धिं नीतम् ।

शकाब्दाः १८१२.—संवत् १९४७.

एतत्पुस्तकं १८६७ सप्तषष्ट्युत्तराष्टादशशततमाब्दिकराजनियमानुसारतः
पुनर्मुद्रणाधिकारे प्रकाशयित्रा स्वायत्तीकृतमस्ति.

॥ श्रीः ॥

विद्वदभ्यर्थना.

स्वस्तिश्रीमत्समस्तजगदाधारपरमकरुणावतारस्य घनश्यामकल्पविटपिविशङ्कटविटपतटप्रकटप्रोत्फुल्लसुमनःसमानमृदुलभक्तावतंसमनःसिंहासनकृताधिवासनस्य भगवतो नारायणस्य लीलातः प्रवर्तमानायामस्यां पञ्चम्यां भूतसृष्टौ समस्तकविकलाकोविदस्याप्यवगतसकलशास्त्रस्य निजयशःसुधाधवलितविशुद्धविज्ञानविलसितविबुधजनमानसमन्दिरस्य नितान्तशौर्यौदार्यधैर्यवीर्यगाम्भीर्यसौशील्यादिगुणमणिगणाभरणविभूषितकलेवरस्य, पवित्रचरित्रपवित्रीकृतधरित्रीवलयस्य, सकलावनीशवन्दितचरणस्य, दिगन्तरलुठत्कीर्ते राजर्षिप्रवरस्य, श्रीमतो भर्तृहरिमहीपालस्य निजानुभवपुरःसरं संसारतत्त्वार्थसारोपदेशदेशिकीभूतमिदं शतकत्रयात्मकं नीतिशृङ्गारवैराग्यविषयनिबद्धं काव्यं समस्तजनकल्याणाय संप्रसार्यमाणं विबुधजनचेतोमहानन्दं समुत्पादयतीति हि तावद्भूयो भूयो जोघुष्यत एव सरलबुद्धिभिर्विद्वद्भिः ॥

तदेतत्काव्यमनन्वितटीकार्थमलव्यस्तनिर्गलितनिरर्गलविषयमासीत् । नादशाव्यवस्थया ग्रन्थदोषं पर्यालोच्य सहृदयसूचनया प्रेरितोऽहं गोदावरीतीरविलसत्पञ्चवटीनासिकक्षेत्रनिवासिभिर्महादेवोपनामधेयैः कृष्णशास्त्रिभिर्नवीनां काव्यार्थानुगतां टीकां कारयित्वा प्राचीनलिखितपत्रपुस्तकानि मेलयित्वा ग्रन्थं शोधयित्वा सुविमलसीसकाक्षरैरङ्कयित्वा विदुषामग्रतः प्रसिद्धिमनैषम् । तद्धि सुधियो मदीयं प्रयासमभिनन्दनेन कृतार्थयन्त्वित्याशासे ॥

श्रीः ।

श्रीमद्भर्तृहरिकृतं

नीतिशतकं प्रारभ्यते ।

भक्तचित्तानुरोधेन धत्ते नानाकृतीः स्वयम् ।
अद्वैतानन्दरूपो यस्तस्मै भगवते नमः ॥ १ ॥
गोदावारितटवर्तिनासिकमहाक्षेत्रे पवित्रे वस-
न्यालंभट्टतनूभवो जननभूर्लक्ष्मीर्यदीया सती ।
तेनेयं विवृतिर्महाबलपराभिख्येन कृष्णेन हि
श्रीमद्भर्तृहरिप्रणीतशतकत्रय्याः कृता यत्नतः ॥ २ ॥
अर्थद्योतनिका भूयाद्विदुषां प्रीतयेऽनिशम् ।
त एवात्र विचिन्वन्तु गुणदोषौ विमत्सराः ॥ ३ ॥

इह खलु राजर्षिप्रवरः श्रीभर्तृहरिरुभयलोकसाधकं नीतिशृङ्गारवैराग्याख्यशतकत्रयात्मकं ग्रन्थं चिकीर्षुः सदाचरणस्य नीतिज्ञानपूर्वकत्वात्तज्ज्ञानाय प्रथमं नीतिशतकमारभमाणः प्रारीप्सितस्य ग्रन्थस्याविघ्नतासिद्धये नमस्कारात्मकं मङ्गलमाचरति—

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥ १ ॥

दिगिति ॥ दिग्दिशा । कालो भूतादिः । आदिशब्देन देशवयआदि । दिक्च कालश्च तावादी येषां देशवयआदीनां तैरनवच्छिन्नाऽव्याप्ताऽतएवानन्ता चिन्मात्रा चिद्रूपा मूर्तिर्देहो यस्य तस्मै, शान्ताय शान्तस्वरूपाय, तेजसे प्रकाशरूपाय, भगवते ब्रह्मणे नमोऽस्तु । ननु यं नमसि तदस्तित्वविषये किं मानं तत्र हेतुगर्भं विशेषणमाह । स्वानुभूत्येकमानायेति । स्वस्यानुभूतिरनुभवः यद्वा स्वा स्वकीयाऽनुभूतिः सैवैकं मानमस्तित्वज्ञापकं यस्य तस्मै । अस्मिन् शतकत्रये दृष्टेषु बहुषु पुस्तकेषु कचिच्छ्लोकानां पूर्वापरस्थलव्यत्ययः परस्परमिश्रीभावश्च दृश्यते तद्विचारोऽत्र न कृतः स सुधीभिर्विचारणीयः । अनुष्टुप् वृत्तम् ॥

एवंहि पुरा वृत्तम्—जरारोगादिनाशकमायुर्वर्धकं किमपि फलं कुतश्चिद्ब्राह्मणाद्भर्तृहरिणा लब्धं तत्स्वपत्न्यै राज्ञा दत्तं, साप्यन्यसक्तत्वादन्यस्मै दत्तवती, सोऽपि पुरुषोऽन्यस्यै दत्तवान्, सापि पुना राज्ञे दत्तवती, तद्दृष्ट्वा प्ररमं वैराग्यमापन्नो राजा स्वसहितान्पत्न्यादीन्निन्दति—

यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परितुष्यति काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च ॥ २ ॥

यामिति ॥ अहं यां सततं निरन्तरं हृदि चिन्तयामि सा मयि विरक्ताऽस्ति । साप्यन्यं जनं जारपुरुषमिच्छति वाञ्छति, स जनोऽप्यन्यस्मिंस्त्रीजने सक्त आसक्तः, यद्वाऽन्यस्यां सक्तः, सर्वनाम्नो वृत्तिमात्रे पुंवद्भावात् । अस्मत्कृते चास्मदर्थे त्वन्या काचित्परितुष्यति संतोषं प्राप्नोति । अतो याऽस्मदर्थे परितुष्यति तां धिक् । अन्यसक्तं तं जनं धिक् । इमां मदीयां स्त्रियं मां च धिक् । इदं सर्वं मदनकृतमिति तं मदनमपि धिगित्यर्थः । वसन्ततिलकावृत्तम् । तदुक्तं वृत्तरत्नाकरे—"उक्ता वसन्ततिलका तभजा जगौ गः" इति ॥

अत्र लोके हि त्रिविधा जनाः अज्ञः सुज्ञोऽल्पज्ञश्चेति । तत्राऽद्यः सुखसाध्यः द्वितीयस्तु सुखतरसाध्यः तृतीयस्त्वसाध्य इत्याह—

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ ३ ॥

अज्ञ इति ॥ न जानातीत्यज्ञः । अकिंचिज्ज्ञ इत्यर्थः । स तु सुखं यथा स्यात्तथाऽऽराध्यः सेव्यः । विशेषं जानातीति विशेषज्ञः स तु सुखतरमतिसुखेनाऽऽराध्यते । ज्ञानस्य लवो लेशस्तेन दुर्विदग्धः दुःशब्दो दुष्टार्थकः हिताहितविवेकशून्यत्वेन दुष्टं यथा स्यात्तथा चतुरः । ज्ञानलेशमात्रेणाऽऽत्मानं पण्डितंमन्य इति यावत् । एतादृशं नरं ब्रह्माऽपि चतुर्मुखोऽपि न रञ्जयति न साधयति । न वशीकरोतीति यावत् । काऽन्येषां वार्तेत्यर्थः । आर्या वृत्तम् । तदुक्तं श्रुतबोधे—"यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि । अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या" इति ॥

मूर्खजनचित्ताराधनं दुर्घटमिति बहुदृष्टान्तैः स्पष्टयति श्लोकद्वयेन—

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरा-
त्समुद्रमपि संतरेत्प्रचलदूर्मिमालाकुलम् ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ४ ॥

प्रसह्येति ॥ मकरो जलजन्तुविशेषस्तस्य वक्त्रं मुखं तत्संबन्धिन्यो या दंष्ट्रा-स्तासामन्तरं मध्यं तस्मात् । "दंष्ट्राङ्कुरात्" इत्यपि पाठः । तन्मुखपतितमपि मणिं प्रसह्य हठादुद्धरेन्निष्कासयेत् । तथा प्रचलन्त्यो या ऊर्मिमालास्तरङ्गप-ङ्क्तयस्ताभिराकुलं व्याप्तं समुद्रमपि संतरेत्पारं गच्छेत् । तथा कोपितं भुजङ्गं सर्पं हस्तेनोद्धृत्य शिरसि मस्तके पुष्पवत्कोऽपि धारयेत्, परंतु सत्यसति वा वस्तुनि प्रतिनिविष्टमाविष्टं मूर्खजनस्य चित्तं नाराधयेन्न साधयेत् । न चालयेदित्यर्थः । पृथ्वी वृत्तम् । "जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः" इति तल्लक्षणात् ॥

किंच—

लभेत सिकतासु तैलमपि यत्नतः पीडय-
न्पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटञ्छशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ५ ॥

लभेतेति ॥ कश्चित्सिकताः यत्नतस्तैलनिष्कासनोपायेन, पीडयन्मर्दयन् सिकतासु वालुकास्वपि तैलं लभेत प्राप्नुयात् । तथा पिपासार्दिततृषापीडितो मृगतृष्णिकासु मृगजलेषु सलिलमुदकं कदाचित्पिबेत् । कदाचित्पर्यटन्पर्य-टनशीलः पुरुषः शशो मृगविशेषस्तस्य विषाणं शृङ्गं ब्रह्मणाऽसृष्टमप्यासाद-येत्प्राप्नुयात्, परंतु प्रतिनिविष्टमूर्खजनचित्तं नाराधयेत् । पूर्वोक्तमेव वृत्तम् ॥

खलजनाः केनाप्युपायेन सन्मार्गे वर्तयितुमतिदुःशका इत्याह—

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
छेत्तुं वज्रमणीञ्छिरीषकुसुमप्रान्तेन संनह्यते ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
नेतुं वाञ्छति यः खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः ॥ ६ ॥

व्यालमिति ॥ यः सतां पथि मार्गे सुधामृतं स्यन्दन्ते प्रस्रवन्ति तच्छीलैः सूक्तैः सुवचनैः खलान्दुर्जनान्नेतुं वाञ्छतीच्छति असौ व्यालं सर्पं दुष्टगजं वा । "व्यालो दुष्टगजे सर्पे" इति मेदिनी । बालैः कोमलैर्मृणालतन्तुभिः कम-

लबिसतन्तुभी रोद्धुं बद्धुं समुज्जृम्भते सम्यक्चेष्टते तथा वज्रमणीन्हीरकमणीन्। "वज्रो स्त्री हीरके पवौ" इत्यमरः। शिरीषकुसुमस्य पुष्पविशेषस्य 'शिरस' इति ख्यातस्य। "शिरीषस्तु कपीतनः" इत्यमरः। प्रान्तेन प्रान्तभागेन छेत्तुं भेत्तुं संनह्यते संनद्धो भवति। तथा क्षाराम्बुधेः क्षारजलसमुद्रस्य माधुर्यं मृष्टजलत्वं मधुबिन्दुना माक्षिकबिन्दुना। "मधु क्षौद्रं माक्षिकादि" इत्यमरः। रचयितुं कर्तुमीहते चेष्टते। एवं च व्यालादयो यथा मृणालतन्त्वादिभिर्बन्धनादि कर्तुमशक्यास्तथा केनाप्युपायेन खलजनाः सन्मार्गे वर्तयितुं दुःशका इति भावः। शार्दूलविक्रीडितं वृत्तम्। "सूर्याश्वैर्मसजस्तताः सगुरवः" इति तल्लक्षणात्॥

इदानीमज्ञजनानामज्ञताऽऽवरणोपायमाह—

स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्॥ ७॥

स्वायत्तमिति॥ विधात्रा ब्रह्मणा अज्ञताया मौर्ख्यस्य छादनमावरणम्। "छदिर् आवरणे" धातुः। मौनं तूष्णींभावः विनिर्मितं रचितम्। कीदृशम्। स्वस्याऽऽत्मन आयत्तमधीनम्। "अधीनो निघ्न आयत्तः" इत्यमरः। पुनः कीदृशम्। एकान्तगुणं एकान्ता अतिशयिता गुणा यस्मिंस्तत्। "अथातिशयो भर" इत्युपक्रम्य। "तीव्रैकान्तनितान्तानि" इत्यमरः। विशेषतो विशेषेण सर्वं विन्दन्ति जानन्ति ते सर्वविदस्तेषां समाजे समूहे। सभायामिति यावत्। सदसद्विवेकवती बुद्धिः पण्डा, संजाता येषां ते पण्डिताः न पण्डिता अपण्डितास्तेषां विभूषणमलंकरणं भवति। अज्ञस्य स्वाज्ञानावरणे मौनादन्य उपायो लोके नास्तीति भावः। इन्द्रवज्रा वृत्तम्। "स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति॥

किंचिज्ज्ञानात्सर्वज्ञत्वाभिमानो भवति विशेषज्ञानात्तु तदभाव इति सदृष्टान्तेनाऽऽह—

यदा किंचिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किंचित्किंचिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥ ८॥

यदेति॥ यदाऽहं किंचिज्जानातीति किंचिज्ज्ञः, द्वाभ्यां मुखशुण्डाभ्यां

पिबतीति द्विपो गजः यथा मदेन मदजलेनान्धो विवेकशून्यस्तथाऽहमपि किंचिज्ज्ञत्वमदेनान्धः कार्याकार्यविवेकशून्यः समभवमासं, तदा सर्वमखिलं जानातीति सर्वज्ञोऽस्मीति मम मनोऽवलिप्तं गर्वितमभवत् । यदा बुधजनसकाशाद्विद्वज्जनसकाशात्किंचित्किंचिच्छास्त्रादिकमवगतं प्राप्तं तदा मूर्खोऽस्मीति मम मनोऽभवदिति पूर्वस्यैवानुषङ्गः । ततो ज्वर इव मे मदो व्यपगतो नष्टः । यथा सदौषधेन ज्वरो गच्छति तथा विद्वज्जनसकाशात्प्राप्तेन ज्ञानेनाहं सर्वज्ञोऽस्मीत्यभिमानो गत इत्यर्थः । ज्वर इति सर्वरोगोपलक्षणम् । शिखरिणी वृत्तम् । "रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी" इति लक्षणात् ॥

इदानीं तुच्छेषु विषयेषु लुब्धं जनं श्वदृष्टान्तेन निन्दति—

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसं प्रीत्या खादन्नरास्थि निरामिषम् ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
नहि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥ ९ ॥

कृमिकुलचितमिति ॥ कृमीणां कीटानां कुलैः समूहैश्चितं व्याप्तम् । लाला मुखमलं तेन क्लिन्नमार्द्रम् । "आर्द्रं सार्द्रं क्लिन्नम्" इत्यमरः । विगन्धि दुर्गन्धमतएव जुगुप्सितं निन्द्यम् । निरामिषं निर्गतमामिषं मांसं यस्मात्तत् । शुष्कमित्यर्थः । नरास्थि मनुष्यदेहास्थि, निर्गता उपमा यस्यैतादृशोऽनुपमो रसः स्वादो यस्मिन्कर्मणि यथा तथा । "रसो गन्धरसे जले" इत्यारभ्य "पारदस्वादयोः पुमान्" इति मेदिनी । प्रीत्या प्रीतिपूर्वकं खादन्भुञ्जन् श्वा शुनकः । "शुनको भषकः श्वा स्यात्" इत्यमरः । पार्श्वस्थं निकटस्थितं सुरपतिमिन्द्रं विलोक्यापि न शङ्कते न लज्जते । हि यस्मात्क्षुद्रोऽल्पो जन्तुः प्राणी परिग्रहस्य फल्गुतां तुच्छतां न गणयति न मनुते किन्त्वतितुच्छं लोकैर्निन्दितमपि कर्म करोत्येवेति भावः । हरिणी वृत्तम् "रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा" इति लक्षणात् ॥

उत्तमपदाच्च्युतः पुरुषोऽधःपतनं प्राप्नुवन्क्षुद्रपदं प्राप्नोति न पुनरुच्चपदमिति गङ्गादृष्टान्तेनाह—

शिरः शार्वं स्वर्गात्पतति शिरसस्तत्क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।
अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ १० ॥

शिरः शार्वमिति ॥ विष्णुपदादुत्तमान्निर्गता गङ्गा, स्वर्गात्प्रथमं शार्वः शिवस्तस्येदं शार्वं शिरो मस्तकं प्रति पतति, तत्ततः शिरसः क्षितिधरं हिमालयपर्वतं पतति। उत्तुङ्गादत्युच्चान्महीं पृथ्वीं धारयतीति महीध्रः पर्वतस्तस्मात्। "मूलविभुजादित्वात्कः" अवनिं भूमिं पतति, अवनेश्चापि सहस्रमुखैर्जलधिं समुद्रं पतति, एवमियं गङ्गा क्रमेणाधोधः पतन्ती स्तोकमल्पं पदमुपगता अथवा विवेकभ्रष्टानां सदसद्विचारशून्यानां विनिपातो विशेषेण पतनं। नीचस्थितिरिति यावत्। शतमनेकानि मुखानि द्वाराणि यस्य यस्मिन्वा एतादृशो भवति। यथा गङ्गा उत्तमस्थानाद्विष्णुपदान्निर्गता शिवमस्तकं प्रत्यायाता एतदपेक्षयाऽन्यदुत्तमं निवासयोग्यं स्थानं नास्तीति मनसि विचारमकृत्वा क्रमेण पर्वतादौ पतन्ती सहस्रमुखैर्जलधिं डलयोरैक्याज्जडाश्रयं नीचमेव पदं प्राप्ता न पुनरुत्तमं पदं तथा विवेकशून्याः पुरुषा ह्यनेकद्वारैर्नीचपदमेव प्राप्नुवन्ति नोत्तमं पदमिति भावः। शिखरिणी वृत्तम्। लक्षणं तूक्तमेव ॥

सर्वोपद्रवनिवर्तकोपायः शास्त्रे लोके च दृष्टो मूर्खबोधकोपायो न क्वाऽपि दृष्ट इत्याह—

शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्॥ ११॥

शक्य इति ॥ हुतं हविरादि भुङ्क्ते इति हुतभुगग्निः "हिरण्यरेता हुतभुक्" इत्यमरः। जलेनोदकेन वारयितुं शमयितुं शक्यः। शक्य इति क्रियाया यथासंभवं सर्वत्रान्वयः। सूर्यस्यातप उष्णत्वं छत्रेण, तथा समदो मदयुक्तो नागेन्द्रो गजो निशितेनाङ्कुशेन, यथा गौश्च गर्दभश्च तौ दण्डेन लगुडेन। "दण्डोऽस्त्री लगुडेऽपि स्यात्" इत्यमरः। व्याधी रोगो भेषजस्यौषधस्य सङ्ग्रहैः सेवनैः, तथा विषं विविधैरनेकैर्मन्त्रप्रयोगैः। एवं सर्वस्योपद्रवस्य शास्त्रविहितमौषधं निवर्तकोपायोऽस्ति परंतु मूर्खस्यौषधं शास्त्रविहितं लौकिकं च नास्ति। मूर्खत्वविघातक उपायो नास्तीत्यर्थः। शार्दूलविक्रीडितं वृत्तम्। लक्षणं तूक्तमेव ॥

यस्तु साहित्यशास्त्राद्यनभिज्ञः स तु नराकारः पशुरेवेत्याह—

साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ॥ १२ ॥

साहित्येति ॥ साहित्यं काव्यालङ्कारादि, संगीतं गानादि, कला शिल्पं, ताभिर्विहीनो रहितो नरः पुच्छं लाङ्गूलं विषाणं शृङ्गं ताभ्यां हीनः "पुच्छोऽस्त्री लूमलाङ्गूले, अतस्त्रिषु विषाणं स्यात्पशुशृङ्गे" इति चामरः । साक्षात्पशुरेव । ननु पशवस्तृणं भक्षयन्त्ययं तु घुतो न खादतीति चेत्तत्राह तृणमिति । तृणं न खादन् भक्षयन्नपि जीवमान इति यत् तत्पशूनां परममुत्कृष्टं भागधेयमदृष्टम् । अन्यथा तेषां तृणाद्यलाभाज्जीवनमपि न स्यादिति भावः । तस्मान्मनुष्येण साहित्यादिकमवश्यं संपादनीयमिति तात्पर्यम् । उपजातिर्वृत्तम् । "उपेन्द्रवज्रा जतजास्ततो गौ स्यादिन्द्रवज्रा यदि तौ जगौ गः । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥" इति तल्लक्षणात् ॥

येषां विद्यादि नास्ति तेषां पशुभूतानां मनुष्यरूपेण भूमौ संचरणमित्याह—

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥ १३ ॥

येषामिति ॥ येषां विद्याव्याकरणमीमांसादिः न नास्ति, तपो व्रतोपवासादि न, दानं सत्पात्रे गवादि धनार्पणं न, ज्ञानं शास्त्रीयं व्यावहारिकं च न, शीलं सद्वृत्तं न, गुणः सत्त्वगुणः लोकानेकविधकार्यसाधको वा न, धर्मः सदाचरणादिः न, ते मृगाः पशुभूताः "मृगः पशौ कुरङ्गे च" इति मेदिनी । नरा भुवि भारभूताः सन्तो मनुष्यरूपेण चरन्ति संचरन्ति । विद्याविहीना मनुष्यरूपेणोपलभ्यमाना अपि पृथिव्या भारभूताः साक्षात्पशव एवेत्यर्थः । तथा च पुरुषेण पशुत्वनिवारकविद्यादिकमवश्यं संपादनीयमित्यनेन सूचितम् । पूर्वोक्तमेव वृत्तम् ॥

पर्वतादौ वनचरैः सह भ्रमणं श्रेष्ठं, न मूर्खजनसंसर्गः स्वर्गेऽप्युचित इत्याह—

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसंपर्कः सुरेन्द्रभवनेष्वपि ॥ १४ ॥

वरमिति ॥ पर्वतदुर्गेषु गन्तुमशक्येष्वपि स्थानेषु वने चरन्तीति वनेचरा व्याघ्रादयस्तैः सह भ्रान्तं भ्रमणम् । भावे क्तः । वरमुचितम् । सुरेन्द्रभव-

नेष्वपि मूर्खजनस्य संपर्कः संसर्गो वरो न भवति । तथा च मूर्खजनसंसर्गः सर्वथा त्याज्य इति तात्पर्यम् । अनुष्टुप् वृत्तम् ॥

यस्य राज्ञो देशे कवयो निर्धनाः सन्ति स राज्ञो दोष इति मणिपरीक्षकदृष्टान्तेनाह—

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।
तज्जाड्यं वसुधाधिपस्य कवयोऽप्यर्थं विनापीश्वराः
कुत्स्याः स्युः कुपरीक्षका हि मणयो यैरर्घतः पातिताः ॥ १५ ॥

शास्त्रोपस्कृतेति ॥ यस्य प्रभो राज्ञो विषये देशे शास्त्रेण व्याकरणादिनोपस्कृता अलङ्कृता ये शब्दास्तैः सुन्दरा गीर्वाणी येषां ते तथा शिष्येभ्यः प्रदेयो दातुं योग्यः । अध्यापनयोग्य इति यावत् । आगमः शास्त्रं येषामत एव विख्याताः प्रसिद्धाः कवयो निर्धना धनरहिता वसन्ति तद्वसुधायाः पृथिव्या अधिपस्य राज्ञो जाड्यं दोषोऽस्ति न सुधियाम् । हि यतस्तेऽर्थं द्रव्यादि विनापीश्वराः सन्ति । तत्र दृष्टान्तः । यैः परीक्षकैर्मणयो रत्नादयोऽर्घतो मूल्यतः पातिताः बहुमूल्या मणयोऽल्पमूल्याः कृता अतस्ते कुपरीक्षका ज्ञानशून्याः कुत्स्या निन्द्या न तु मणय इत्यर्थः । तथा च रत्नानां मूल्यं यथार्थमजानन्तः परीक्षका यथा निन्द्यास्तथोक्तविधकवीनां वास्तवं स्वरूपमजानन्तो राजानोऽपि निन्द्या इति भावः । अनेन सत्यैश्वर्ये राज्ञा कवयः संमाननीया इति व्यज्यते । शार्दूलविक्रीडितं वृत्तम् ॥

इदानीं राज्ञा विद्वांसः संमाननीया न तु गर्वेण तिरस्करणीया इति नीतिं विद्याप्रशंसापूर्वकं तं प्रति बोधयन्नाह द्वाभ्याम्—

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा
ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥ १६ ॥

हर्तुरिति ॥ यद्धनं हर्तुश्चोरादेर्गोचरमक्षिविषयं न याति न प्राप्नोति तथा किमपि शं कल्याणं पुष्णाति पोषयति, सर्वदाऽर्थिभ्यो याचकेभ्योऽनिशं निरन्तरं प्रतिपाद्यमानं दीयमानमपि परामुत्कृष्टां वृद्धिं प्राप्नोति । वर्धत इति यावत् ॥ तदुक्तम् "अपूर्वः शब्दकोशोऽयं विद्यते तव भारति । व्ययतो वृद्धिमाप्नोति क्षयं प्राप्नोति गोपनात् ॥" इति । किंच कल्पान्तेष्वपि निधनं नाशं

न प्रयाति न गच्छति एतादृशविद्याख्यं विद्यानामकमन्तर्धनं गुप्तं धनं येषां तैः सह कः पुरुषः स्पर्धते स्पर्धां करोति न कोऽपि । अतो हे नृपास्तान्प्रति वयं धनवन्तो राजानः इमे त्वतिदरिद्रास्तुच्छा इति मानं गर्वमुज्झत । त्यजतेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥

किंच—

अधिगतपरमार्थान्पण्डितान्मावमंस्था-
स्तृणमिव लघु लक्ष्मीर्नैव तान्संरुणद्धि ।
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति बिसतन्तुर्वारणं वारणानाम् ॥ १७ ॥

अधिगतेति ॥ अधिगतः प्राप्तः परमार्थो यैस्तान्पण्डितान् लघु तुच्छं तृणमिव माऽवमंस्था अपमानं मा कुरु । यतो लक्ष्मीरपि तान् नैव संरुणद्धि रोद्धुं न शक्नोति । तत्र दृष्टान्तः । अभिनवो नूतनो यो मदो मदजलं तस्य लेखा पङ्क्तिस्तया श्यामे गण्डस्थले येषां तेषां वारणानां गजानां बिसतन्तुः कमलनालतन्तुर्वारणं रोधको न भवति । मालिनी वृत्तम् "ननमयययुतेयं मालिनी भोगिलोकैः" इति तल्लक्षणात् ॥

आनुषङ्गिकगुणनिवर्तको लोको दृष्टः स्वभावसिद्धगुणं निवर्तयितुं कोऽपि समर्थो नास्तीति हंसदृष्टान्तेन दर्शयन्नाह—

अम्भोजिनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ १८ ॥

अम्भोजिनीति ॥ कुपितो विधाता ब्रह्मा हंसस्याम्भोजिनीनां कमलिनीनां वनं निवासस्थानम् "वनं नपुंसकं तीरे निवासे" इति मेदिनी । तत्र निवासेन यो विलासस्तमेव नितरां हन्ति नाशयति, परंत्वस्य हंसस्य दुग्धं च जलं च तयोर्भेदः पृथक्करणं तस्य विधौ विधाने प्रसिद्धां लोकविश्रुतां वैदग्ध्यं स्वाभाविकचातुर्यं तस्य कीर्तिमपहर्तुं दूरीकर्तुमसौ ब्रह्माऽपि न समर्थः । काऽन्यस्य वार्तेत्यर्थः । वसन्ततिलका वृत्तम् । लक्षणं तूक्तमेव ॥

अङ्गदाद्यलङ्कारेभ्यो वागलङ्कारो गरीयानित्यवश्यं स संपादनीय इत्यभिप्रायेणाह—

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।

वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥ १९ ॥

केयूरा इति ॥ केयूरा बाहुभूषणानि पुरुषं न भूषयन्त्यलङ्कुर्वन्ति । चन्द्रोज्ज्वलाश्चन्द्रकान्तिसदृशा हारा मुक्तादिरचिता माला न, तथा स्नानं न, विलेपनं चन्दनादि न, कुसुमं पुष्पं न, अलङ्कृता मूर्धजाः केशा न, किं तु एका वाणी पुरुषं समलङ्करोति सम्यग्भूषयति। सा का । या संस्कृता व्याकरणादिसंस्कारयुक्ता विद्वद्भिर्धार्यते । वागतिरिक्तानि भूषणानि क्षीयन्ते खलु न तु वाग्भूषणं क्षीयतेऽतो वाग्भूषणमेव सततं निरन्तरम् । अक्षयमिति यावत् । भूषणमलङ्करणं नान्यदिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥

विद्यैव नरस्य रूपादिकमस्ति तद्रहितो नरः पशुरेवेत्याह—

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः ॥ २० ॥

विद्येति ॥ नामेति संभावनायाम् । नरस्य पुरुषस्य विद्यैवाधिकं श्रेष्ठं रूपमस्ति विद्यावन्तः कुरूपा अपि सर्वत्र मान्या भवन्ति न तथा केवलं सुरूपाः । किंच प्रच्छन्नं स्वान्तस्थितत्वेनेतरानपहार्यं गुप्तं च बाह्यसाधनानपेक्षमननादिना रक्षितं च । प्रसिद्धधनं तु चोराद्यपहार्यं पेटकादिरक्षितं च । विद्या, भुज्यत इति भोगोऽन्नवस्त्रादि तत्करोतीति करी । संपादिकेति यावत् । तथा यशः कीर्तिं सुखमानन्दं च करोतीति यशःसुखकरी । तद्धेतुरित्यर्थः । "कृञो हेतुताच्छील्यानुलोम्येषु" इति टः । विद्यैव गुरूणामुपदेष्टॄणां गृणाति हितमुपदिशतीति गुरुरुपदेष्ट्री । विद्यैव विदेशगमने बन्धुजनो बन्धुवद्धितकारी । परमुत्कृष्टं दैवतं विद्यैव ॥ विद्यैव राज्ञा सुष्टु पूजिता, धनं द्रविणं तु न । अतो विद्यया विहीनो रहितः पशुरेव । तदुक्तम् "विहिताविहितविचारशून्यबुद्धेः श्रुतिविषयैर्विधिभिर्बहिष्कृतस्य । उदरभरणमात्रकेवलेच्छोः पुरुषपशोश्च पशोश्च को विशेषः ॥" इति । तस्मात्पुरुषेण पशुत्वव्यावृत्तये विद्यैवावश्यं संपादनीयेति तात्पर्यम् । पूर्वोक्तमेव वृत्तम् ॥

क्षमादिगुणयुक्तस्यैतैर्वचनादिभिः किमित्याह—

क्षान्तिश्चेद्वचनेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम् ।

किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि
व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ॥२१॥

क्षान्तिश्चेदिति ॥ क्षान्तिः क्षमा चेद्वचनेन जगन्मनोहारिभाषणेन यद्वा दुर्जनोक्तनिन्द्यभाषणेन किम् । क्षमयैव सर्वं जगत्प्रसन्नं भवतीत्यर्थः । देहिनां शरीरिणां क्रोधोऽस्ति चेदरिभिः शत्रुभिः किम् । इह लोकपरलोकभ्रंशनादि-सर्वं शत्रुकर्म स एव करिष्यतीत्यर्थः । ज्ञातिः स्वजातिः संनिधावस्ति चेद-नलेनाग्निना किम् । अग्निकृतं तापादिकं सैव करिष्यति । यदि सुहृत्सखा हितकर्ता चेद्दिव्यौषधैरुत्तमौषधैः फलं साध्यं किम् । यद्वा सुष्ठु सन्तुष्टं हृद-न्तःकरणम् । "स्वान्तं हृन्मानसं मनः" इत्यमरः । औषधैः शरीरहितं भवति तत्सुहृदा भवति । यदि दुर्जनाः खलाः सन्ति तर्हि सर्पैः किम् । दंशनं विनापि दुर्जनैः प्राणघातादिकरणे सर्पैः किं प्रयोजनमित्यर्थः । यदि अनव-द्याऽनिन्द्या विद्या चेद्धनैर्द्रव्यैः किमु । धनेन यथा सुखं तथा विद्ययैव भव-तीत्यर्थः । यदि व्रीडा लज्जा चेद्भूषणैर्बहिरलङ्कारैः किमु । तयैवालङ्करणकार्यं भवति । यदि सुष्ठु कीर्त्यादिवर्णनचतुरा कविता पद्यादिरचनाऽस्ति चेत्तर्हि राज्येन किम् । तयैव राज्यादिसुखं भवतीत्यर्थः । वृत्तं पूर्वोक्तमेव ॥

उचितक्रियां कुर्वति जने न्यायमार्गस्थितिर्भवतीत्याह—

दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवम् ।
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥ २२ ॥

दाक्षिण्यमिति ॥ स्वजने पुत्रकलत्रादौ दाक्षिण्यमौदार्यं सारल्यम् । "दक्षिणे सरलोदारौ" इत्यमरः । परजने स्वीयातिरिक्तजने दया कृपा । दुर्जने खलजने सदा शाठ्यं वञ्चकत्वम् । साधुजने प्रीतिः । नृपजने नयो नीतिः । विद्वज्जनेषु पण्डितेष्वार्जवमृजुता । शत्रुजने शौर्यं शूर-त्वम् । गुरुजने महाजने क्षमा तत्कृतोपद्रवसहनम् । नारीजने स्त्रीजने धूर्तता धौर्त्यम् । एवंप्रकारेण ये पुरुषाः कलासु कुशला निपुणास्तेष्वेव लोकानां स्थितिर्न्यायमार्गसंस्था । "संस्था तु मर्यादाधारणास्थितिः" इत्यमरः । सर्वे लोकास्तदनुरोधेन वर्तन्त इत्यर्थः । पूर्वोक्तं वृत्तम् ॥

सत्संगतिर्जाड्यहरणादिकं सर्वं करोतीत्याह—

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।

चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम् ॥ २३ ॥

जाड्यमिति ॥ सतां साधूनां संगतिः समागमः धियो बुद्धेर्जाड्यं मन्दतां हरति नाशयति। वाचि वाण्यां सत्यं सिञ्चति यत्संगत्या लोकाः सत्यमेव वदन्तीत्यर्थः। मानस्य संमानस्योन्नतिमुन्नतां दिशति ददाति। पापमपाकरोति दूरीकरोति। चेतश्चित्तं प्रसादयति। अहङ्काराद्यपाकरणेन प्रसन्नतां नयतीत्यर्थः। दिक्षु दिशासु कीर्तिं तनोति विस्तारयति। एवं सत्संगतिः पुंसां किंकिं न करोतीति कथय वद। किं तु सर्वानर्थान्साधयतीत्यर्थः। वसन्ततिलका वृत्तम्। लक्षणं पूर्वमुक्तम् ॥

इदानीं कवीश्वरान्सर्वोत्कर्षत्वेन वर्णयति—

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये जरामरणजं भयम् ॥ २४ ॥

जयन्तीति ॥ रसेषु शृङ्गारादिषु पक्षे पारदादिषु सिद्धाः सिद्धिमन्तः पूर्णाः। सज्जा इति यावत्। ते कवीश्वराः कवीन्द्राः सुकृतिनो धन्याः सन्तः "सुकृती पुण्यवान्धन्यः" इत्यमरः। जयन्ति सर्वोत्कर्षेण वर्तन्ते। ते के। येषां यशःकाये यशोरूपे देहे जरा च मरणं च ताभ्यां जातं भयं नास्ति। यथा सिद्धौषधरससेवनेन प्रसिद्धदेहो जरामरणभयरहितः सन्न नश्यति तथा कवीनां शृङ्गारादिरसपूर्णनानाविधकाव्यवचनजन्यं यशः कदापि न नश्यतीति भावः। अनुष्टुब् वृत्तम् ॥

भगवत्कृपयैव पुत्रादयः सच्चरितादियुक्ता भवन्ति नान्यथेत्याह—

सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः
स्निग्धं मित्रमवञ्चकः परिजनो निःक्लेशलेशं मनः।
आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं
तुष्टे विष्टपहारिणीष्टदहरौ संप्राप्यते देहिना ॥ २५ ॥

सूनुरिति ॥ सूनुः पुत्रः सत् चरितमाचरणं यस्य। सत्क्रियावानित्यर्थः। अतिशयेन प्रिया प्रियतमा पत्नी सती पतिव्रता। "सती साध्वी पतिव्रता" इत्यमरः। स्वामी पालकः प्रसादे प्रसन्नतायामूर्ध्वं मुखं यस्य। सर्वदा प्रसादकर्तेत्यर्थः। मित्रं सखा स्निग्धं वात्सल्यादिगुणयुक्तम्। परिजनः परिवारोऽवञ्चकः। मनोऽन्तःकरणं निःशेषेण गतो रागद्वेषादिजन्यक्लेशस्य लवो लेशो यस्मात्। आकारो हस्तपादाद्यवयवो मूर्तिर्वा रुचिरः सुन्दरः। विभव ऐश्वर्यं स्थिरश्चिरकाल-

स्थायी । मुखमाननं विद्ययाऽवदातं शुद्धम् । "अवदातः सिते पीते शुद्धे" इत्यमरः । इदं पूर्वोक्तं सर्वं पिष्टपं जगद्धरत्युद्धरति तच्छीलस्तस्मिन् ताच्छील्ये णिनिः । "जगत्स्यात्पिष्टपे क्लीवं वायौ ना जङ्गमे त्रिषु" इति मेदिनी । "विष्टप" इत्यपि पाठः । इष्टं ददातीतीष्टदो हरिस्तस्मिन् तुष्टे संतुष्टे सति देहिना शरीरिणा सम्यक्प्राप्यते । नान्यथेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥

प्राणिहिंसाद्यकरणमेव कल्याणमार्ग इत्याह—

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥ २६ ॥

प्राणाघातादिति ॥ प्राणस्य स्वस्यान्यस्य वाऽऽघातो हननं तस्मान्निवृत्तिर्निवर्तनं, परेषां धनस्य द्रव्यस्य हरणे संयमश्चित्तनिग्रहः । परधनहरणे प्रवृत्त्यभाव इत्यर्थः । सत्यवाक्यं यथार्थभाषणं, काले पुण्यकाले शक्त्या यथाशक्त्या प्रदानं ब्राह्मणादिभ्यो दानं, परेषामन्येषां युवतिजनस्य तरुणीजनस्य कथासु मूकभावस्तूष्णीं भावः । वाचा परस्त्रीकथानुद्घाटनमित्यर्थः । तृष्णाया आशायाः स्रोतः प्रवाहस्तस्य विभङ्गो नाशः, गुरुषु महाजनेषु विनयो नम्रता, सर्वभूतेषु सर्वप्राणिष्वनुकम्पा दया, एषः सर्वशास्त्रेषु अनुपहतोऽकुण्ठितः । अप्रतिषिद्ध इति यावत् । विधिर्विधानं यस्यैतादृशः सामान्यः सर्वलोकसाधारणः श्रेयसां कल्याणानां पन्था मार्गो नान्य इत्यर्थः । स्रग्धरा वृत्तम् । "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्" इति तल्लक्षणात् ॥

नीचमध्यमोत्तमानां क्रियारम्भे वैचित्र्यमाह—

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य तूत्तमजना न परित्यजन्ति ॥ २७ ॥

प्रारभ्यत इति ॥ नीचैरद्धैर्विघ्नस्यान्तरायस्य "विघ्नोऽन्तरायः प्रत्यूहः" इत्यमरः । भयं भीतिस्तेन, कर्म न प्रारभ्यते खलु निश्चयेन । मध्या मध्यमाः प्रारभ्य प्रारम्भं कृत्वा विघ्नेन विहताश्चालिताः सन्तो विरमन्ति विरामं प्राप्नुवन्ति । कर्म न कुर्वन्तीत्यर्थः । उत्तमजनास्तु प्रारभ्यारम्भं कृत्वा विघ्नैः पुनःपुनर्वा-

यारं प्रतिहन्यमानाश्चाल्यमाना अपि न परित्यजन्ति । समये समये विघ्ने प्राप्तेऽपि तन्निवृत्त्युपायं कुर्वन्ति । नारब्धं त्यजन्तीत्यर्थः । वसन्ततिलका वृत्तम् ॥

साधुवदेव वर्तितव्यं नासाधुवदिति बोधयितुं साध्वाचारप्रशंसामाह—

असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ २८ ॥

असन्त इति ॥ असन्तो दुर्जनाः, अभ्यर्थितुं याचितुं योग्या अभ्यर्थ्या न । कृशं क्षीणं धनं यस्य स सुहृदपि न याच्यो न प्रार्थनीयः । प्रिया हिता न्यायादनपेताऽरहिता न्याय्या वृत्तिर्जीविका, मलिनं निन्द्यं कर्म असोः प्राणस्य भङ्गो नाशस्तस्मिन्नप्यसुकरं दुष्करम् । प्राणभङ्गसमयेऽपि निन्द्यकर्मानाचरणमित्यर्थः । विपदि विपत्काले उच्चैरुन्नतं स्थेयम् । स्वविपदप्रकटनमित्यर्थः । महतां पदं स्थानमनुविधेयमनुसरणीयम् । इदं पूर्वोक्तं षड्रूपं विषममतिकठिनं असिधारेव खड्गधारेव तीक्ष्णतरं व्रतमाचरणं सतां केनोद्दिष्टमुपदिष्टं न केनापि । अपि तु तेषां स्वभावसिद्धमित्यर्थः । शिखरिणी वृत्तम् ॥

अतिदुःखमापन्नोऽपि मानी महाजनः स्वमहत्त्वविरुद्धं नीचं कर्म न करोतीति सिंहान्योक्त्याह—

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ २९ ॥

क्षुत्क्षामोऽपीति ॥ क्षुधा क्षुधया क्षामो दुर्बलोऽपि जरया कृशोऽपि शिथिलः शैथिल्यं प्राप्तः प्राणः शक्तिर्यस्य । "शक्तिः पराक्रमः प्राणः" इत्यमरः । कष्टां दशामापन्नः प्राप्तोऽपि विपन्ना नष्टा दीधितिर्दीप्तिर्यस्य सोऽपि प्राणेषु नश्यत्स्वपि नाशोन्मुखेषु सत्स्वपि मत्ता मदोन्मत्ताश्च ते इभेन्द्रा गजेन्द्रास्तेषां विभिन्ना विदारिता ये कुम्भा गण्डस्थलानि तत्संबन्धी यः कवलो मांसपिण्डस्तस्य ग्रासो ग्रसनं । भक्षणमिति यावत् । तस्मिन्नेव बद्धैका मुख्या स्पृहा वाञ्छा येन । एतादृशो मानि महतामग्रेसरः केसरी सिंहो जीर्णं छिन्नं तृणमत्ति खादति किम् । अपितु नेत्यर्थः । मानी सिंहः स्वभक्ष्यमपि मांसं विहाय प्राणान्तसमयेऽपि यथा जीर्णतृणादनरूपं नीचं कर्म न करोति तथा मानि-

भिर्महद्भिरपि प्राणान्तसमयेऽपि नीचं कर्म न कर्तव्यमिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥

मानी जनः पूर्वोक्तप्रकारेणाचरन्नपि स्वसत्त्वानुरूपं फलं प्राप्नोतीति श्वसिंहदृष्टान्तेनाह—

स्वल्पं स्नायुवसावशेषमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥ ३० ॥

स्वल्पमिति ॥ स्नायुरङ्गप्रत्यङ्गसन्धिबन्धनशिराविशेषः वसा मेदश्च ताभ्यामवशेषमवशिष्टमत एव मलिनं निर्मांसं मांसरहितमपि स्वल्पं गोर्वृषभस्यास्थि *लब्ध्वा श्वा कुक्कुरो यद्यपि परितोषं संतोषमेति प्राप्नोति परंतु तदस्थि* तस्य शुनः क्षुधायाः शान्तये निवृत्त्यर्थं न भवति । सिंहस्तु अङ्कमुत्सङ्गमागतमपि जम्बुकं शृगालम् "शृगालजम्बुकक्रोष्टु" इत्यमरः । तुच्छत्वबुद्ध्या त्यक्त्वा द्विपं गजमेव निहन्ति । कृच्छ्रं दुःखं गतोऽपि सर्वो जनः सत्त्वस्य स्वस्वभावस्यानुरूपमनुकूलं फलं वाञ्छति इच्छत्येव । "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः" इति मेदिनी । पूर्वोक्तमेव वृत्तम् ॥

क्षुद्रजनस्य तुच्छत्वं महाजनस्य धीरत्वं श्वगजदृष्टान्तेन दर्शयन्नाह—

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ ३१ ॥

लाङ्गलेति ॥ *श्वा कुक्कुरः* पिण्डं ग्रासं ददातीति पिण्डदस्तस्य पुरतः पिण्डलोभेन लाङ्गलस्य पुच्छस्य चालनं तथा अधोऽधोभागे चरणयोः पादयोरवपातः पातनं तथा भूमौ पृथिव्यां निपत्य पतित्वा वदनं मुखमुदरं च तयोर्दर्शनं च कुरुते । गजपुङ्गवो गजश्रेष्ठस्तु धीरं गभीरं यथा स्यात्तथा विलोकयत्यवलोकयति चाटुशतैः प्रियवाक्यशतैः प्रार्थितः सन् भुङ्क्ते । एवं क्षुद्रजनः श्वचल्लोभेन मुखचालनादि करोति । महाजनस्तु गाम्भीर्येण पश्यत्नादरेण प्रियवचनश्लाघितः सन् भुङ्क्ते इति भावः । वसन्ततिलका वृत्तम् ॥

वंशोन्नतिकारक एव पुरुषो गरीयान्नान्य इत्याह—

परिवर्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिम् ॥ ३२ ॥

परिवर्तिनीति ॥ परिवर्तिन्यागमापायवति संसारे को न जायते जातः को वा न मृतः परंतु येन जातेनोत्पन्नेन वंशः कुलं समुन्नतिमुत्कर्षं याति प्राप्नोति स जातः अन्यो जातोऽप्यजातप्राय इत्यर्थः । अनुष्टुब् वृत्तम् ॥

महतां द्विधा वर्तनं पुष्पस्तवकदृष्टान्तेनाह—

कुसुमस्तवकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥ ३३ ॥

कुसुमेति ॥ कुसुमानां पुष्पाणां स्तबको गुच्छः । समूह इति यावत् । तस्येव प्रशस्तं मनोऽस्यास्तीति तस्य विचारवतः पुरुषस्य द्वाववयवौ यस्याः सा द्वयी द्विप्रकारिका "सङ्ख्याया अवयवे तयप्" "द्वित्रिभ्यां तयस्यायज्वा" इत्ययच् "टिड्ढा" इतिङीप् । वृत्तिर्वर्तनं स्थितिरित्यर्थः । द्विप्रकारत्वं च श्रद्धालौ श्रोतरि सति हितोपदेशकरणमेकम् । तदभावे तूष्णींभावेन स्थितिर्द्वितीयम् । कथम् । यथा सति ग्रहीतरि कुसुमस्तवकेन सर्वलोकस्य मूर्ध्नि मस्तकेऽवशीर्यते अथवा ग्रहीतरि असति वने विशीर्यते नश्यति तथा मनस्विनः श्रोतरि सति हितोपदेशकरणेन पूज्या भवन्त्यन्यथा तूष्णींभावेनावतिष्ठन्त इति भावः । अयमेव श्लोकः पाठभेदेन चतुरधिकशतश्लोके दृश्यते अर्थतात्पर्यं त्वेकमेव परंतु बहुपुस्तकेषु दृष्टत्वात्तथैव स्थापितो न तु निष्कासितः । अनुष्टुप् वृत्तम् ॥

दुर्जनः स्वपराक्रमख्यापनार्थमतितेजस्विनं पुरुषं पीडयति नाल्पतेजसमिति राहुदृष्टान्तेनाऽऽह—

सन्त्यन्येऽपि बृहस्पतिप्रभृतयः संभाविताः पञ्चषा-
स्तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते ।
द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्करौ
भ्रान्तः पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः ॥ ३४ ॥

सन्त्यन्ये इति ॥ बृहस्पतिर्गुरुः प्रभृतिर्मुख्यो येषां ते, पञ्च वा षड्वा पञ्चषाः । "संख्यया व्ययासन्ना" इति बहुव्रीहिः "बहुव्रीहौ संख्येये" इति समासान्तो डच् अन्येऽपि संभाविता मान्या ग्रहाः सन्ति, परंतु शीर्षमेव मस्तकमेवाव-

शेषावशिष्टाऽऽकृतिराकारो यस्य स दानवपतिरेप राहुर्यतो विशेषोऽधिको यो विक्रमः पराक्रमस्तस्मिन् रुचिः प्रीतिर्यस्य तथाभूतोऽतस्तान् प्रति न वैरायते वैरं न कुरुते "शब्दवैरकलह—" इति क्यङ्। किंतु भ्रान्तो भ्रमणं कुर्वन् "गत्यर्थ—" इत्यादिना कर्तरि क्तः। भासं दीप्तिं कुरुतस्तौ द्वौ दिनस्य दिवसस्येश्वरः सूर्यः निशाया रात्र्याः प्राणेश्वरश्चन्द्रस्तावेव पर्वणि पूर्णिमायाममावास्यायां च ग्रसते भक्षयते। पीडयतीति यावत्। परुषेति जनं प्रति संबोधयति यथाऽन्यान् ग्रहान्विहाय राहुरतितेजस्विनौ सूर्याचन्द्रमसौ पीडयति तथा दुर्जनोऽप्यल्पं जनं विहाय स्वपराक्रमख्यापनार्थं तेजस्विनं पुरुषं पीडयतीति भावः। शार्दूलविक्रीडितं वृत्तम्॥

महतां चरित्रं निर्मर्यादमस्तीत्याह—

वहति भुवनश्रेणीं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स विधार्यते।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-
दहह महतां निःसीमानश्चरित्रविभूतयः॥ ३५॥

वहतीति॥ शेषः सहस्रशीर्षोऽनन्तः फणानां फटानां फलकं पट्टिका तस्यां स्थिता ताम्। भुवनस्य जगतः श्रेणीं पङ्क्तिं वहति धारयति। स शेषः कमठपतिना कूर्मरूपेण भगवता मध्येपृष्ठं। पृष्ठस्य मध्ये इत्यर्थः। सदा सर्वकालं विधार्यते तमपि कमठपतिं पयोधिः समुद्रः अनादरादनायासेन क्रोडमुत्सङ्गः "क्रोडमङ्कस्तथोत्सङ्गः" इति हलायुधः। तस्याधीनं स्वाधीनं कुरुते। अभ्यन्तरे धारयतीत्यर्थः। अहहेत्याश्चर्ये। महतां चरित्रस्य विभूतय ऐश्वर्याणि निःसीमानो निरवधयः सन्तीति। अनेन सर्वथा तृष्णात्याग उचित इति व्यज्यते। हरिणी वृत्तम्। लक्षणं तूक्तमेव॥

क्लेशयुक्तं पितरं विहायान्यत्र स्वप्राणरक्षाकरणं नोचितमित्याह

वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहलदहनोद्गारगुरुभिः।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे
न चासौ संपातः पयसि पयसां पत्युरुचितः॥ ३६॥

वरमिति॥ पितरि हिमाद्रौ क्लेशस्य दुःखस्य विवशोऽधीने सति पयसां पत्युः समुद्रस्य पयसि जले तुषाराद्रेर्हिमालयस्य सूनोर्मैनाकस्यासौ संपातः पतनं नोचितो न योग्यो भवति किंतु उद्गच्छन्यो बहलोऽतिशयितो दहनोऽग्निस्तस्यो-

द्वार उद्गिरणं तेन गुरुभिः। "रुचिभिः" इति पाठे रुचिः कान्तिर्येषां तैरित्यर्थः। मदेन सहितः समदो यो मघवानिन्द्रस्तेन मुक्तं त्यक्तं कुलिशं वज्रं तस्य प्रहारैः पक्षाणां छेदश्छेदनं वरं श्रेष्ठो भवतीति। अनेन स्वस्य आपत्प्राप्तावप्यापद्गतस्य पितुस्त्यागो नोचित इति ध्वन्यते। शिखरिणी वृत्तम्। लक्षणं पूर्वमुक्तमेव॥

तेजस्वी चेतनः पुरुषः परकृतविकारं न सहत इति सूर्यकान्तमणिदृष्टान्तेनाह—

यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः।
तत्तेजस्वी पुरुषः परकृतविकृतिं कथं सहते॥ ३७॥

यदचेतनोऽपीति॥ यद्यस्मादचेतनोऽपि चेतनारहितोऽपि इनकान्तः सूर्यकान्तमणिः सवितुः सूर्यस्य पादैः किरणैः पक्षे चरणैः स्पृष्टः सन् प्रज्वलति प्रदीप्तो भवति तत्तस्मात्तेजस्वी पुरुषः परेण कृता या विकृतिर्विकारस्तां कथं सहते। न सहत इत्यर्थः। आर्या वृत्तम्। लक्षणं तूक्तमेव॥

पराक्रमोद्दीपकस्य तेजसो हेतुर्वयो न किंतु स्वभाव एवेति सिंहशिशुदृष्टान्तेनाह—

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः॥ ३८॥

सिंह इति॥ शिशुरपि बालोऽपि सिंहः प्रशस्ताः कपोलाः कपोलभित्तयः "प्रशंसावचनैश्च" इति समासः। भित्तिशब्दः प्रशस्तवचनः। तदुक्तं गणरत्नमहोदधौ। "मतल्लिकोद्धमिश्राः स्युः प्रकाण्डस्थलभित्तयः" इति। यद्वा प्रदेशवाचकः। "भित्तिः प्रदेशे कुड्ये च" इति विश्वः। मदेन गजमदेन मलिनाः कपोलभित्तयः प्रशस्तकपोलाः कपोलप्रदेशा वा येषां तेषु गजेषु निपतति वधाय चलति इयं सत्त्ववतां बलवतां प्रकृतिः स्वभाव एव। वयोऽवस्था तेजसो हेतुर्न खलु निश्चयेन। आर्या वृत्तम्॥

द्रव्यं विना सर्वे गुणास्तृणवत्तुच्छप्राया इत्याह—

जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छता-
च्छीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना।
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे॥ ३९॥

जातिरिति॥ जातिर्ब्राह्मणादिस्वजाती रसातलं यातु गच्छतु। गुणानां

गणः समूहस्तस्य रसातलस्याप्यधोऽधोभागे गच्छतात् । शीलं सद्वृत्तम् "शीलं स्वभावे सद्वृत्ते" इत्यमरः । शैलस्य पर्वतस्य तटात्पततु । अभिजनो वंशः । "संततिर्गोत्रजननकुलान्यभिजनान्वयौ" इत्यमरः । वह्निनाऽग्निना संदह्यतां भस्मीक्रियताम् । "दह भस्मीकरणे" धातुः । शौर्ये शूरत्वरूपे वैरिणि शत्रौ वज्रं कुलिशमाशु शीघ्रं निपततु । एवं सर्वस्य हानिर्भवतु परंतु नोऽस्माकं केवलमर्थो धनमस्तु । एकेन मुख्येन येन द्रव्येण विना इमे पूर्वोक्ताः समस्ता गुणास्तृणस्य लवो लेशस्तत्प्रायास्तत्सदृशा अतितुच्छा भवन्ति । शार्दूलविक्रीडितं वृत्तम् ॥

अन्वयव्यतिरेकाभ्यामर्थस्य सर्वापेक्षया श्रेष्ठत्वमाह द्वाभ्याम्—

तानीन्द्रियाणि सकलानि तदेव कर्म सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव त्वन्यः क्षणेन भवतीति विचित्रमेतत् ।

तानीति ॥ सकलानीन्द्रियाणि वागादीनि तान्येव पूर्वसिद्धान्येव । एवमग्रेऽपि । कर्म क्रिया तदेव । अप्रतिहताकुण्ठिता बुद्धिः सैव, वचनं वाक्यं तदेव, स एव पुरुषः अर्थस्य द्रव्यस्योष्मा तेन विरहितः सन् क्षणेन क्षणमात्रेणान्य इव भवतीति एतत् विचित्रमाश्चर्यम् । एकेनार्थेन विना सर्वाणीन्द्रियादीनि व्यर्थानि भवन्ति । तस्मात्पुरुषेणार्थोऽवश्यं संपादनीय इति भावः । अनेन व्यतिरेको दर्शितः । वसन्ततिलका वृत्तम् ॥

किंच अन्वयमाह—

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान्गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ ४१ ॥

यस्येति ॥ यस्य नरस्य वित्तं द्रव्यमस्ति स एव नरः कुलीनः सत्कुलोत्पन्नः स एव पण्डितः बुद्धिमान् स एव श्रुतवान् शास्त्रज्ञः "श्रुतमाकर्णिते शास्त्रे" इति मेदिनी । स एव गुणं जानातीती गुणज्ञः गुणवेत्ता । स एव वक्ता वाग्मी । स च दर्शनीयो दर्शनयोग्यः । रूपवानिति यावत् । सर्वे पूर्वोक्ता गुणाः काञ्चनं सुवर्णमेवाश्रयन्ति । इदं सर्वेषां धनानामुपलक्षणम् । धनसत्त्वे एव सर्वे गुणाः प्रकाशन्त इत्यर्थः । उपजातिर्वृत्तम् । "अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः" इति ॥

राजादयो दौर्मन्त्र्यादिभिर्नश्यन्तीत्याह—

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः संगात्सुतो लालना-
द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।

ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया-
न्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम् ॥ ४२ ॥

दौर्मन्त्र्यादिति ॥ नृपती राजा दुर्मन्त्रिणो भावो दौर्मन्त्र्यं तस्मात्। दुर्मन्त्रसेवनादित्यर्थः। नश्यति स्वराज्याद्भ्रष्टो भवति। यतिः संन्यासी संगात् स्त्र्यादिसंगात् नश्यति। एवमुत्तरत्रापि नश्यतीति संबध्यते। सुतः पुत्रो लालनाच्छिक्षाद्यकरणादित्यर्थः। विप्रो ब्राह्मणोऽनध्ययनात्स्वाध्यायापठनात्, कुलं प्रतिष्ठितवंशः कुतनयात्कुमार्गगामिनः पुत्रात्, शीलं सद्वृत्तम् "शीलं स्वभावे सद्वृत्ते" इत्यमरः। खलस्य दुर्जनस्योपासनं सेवनं तस्मात्, ह्रीर्लज्जा मद्यान्मदिरायाः, कृषिः प्रसिद्धा अनवेक्षणाद्वारंवारमनवलोकनात्, स्नेहः प्रेम प्रवासाश्रयादन्यत्र बहुदिवसवासात्, मैत्री मित्रत्वमप्रणयादविनयात्, समृद्धिरैश्वर्यमनयादनीतेः, धनं त्यागादपात्रेषु दानात्प्रमादादनवधानान्नश्यतीति। अनेन राजादिभिर्दुर्मन्त्रादिसेवनं न कार्यमिति ध्वन्यते। शार्दूलविक्रीडितं वृत्तम्।

दानभोगाभ्यां विहीनस्य धनस्य सर्वथा नाशो भवतीत्याह—

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ ४३ ॥

दानमिति ॥ दानं सत्पात्रेषु, भोगः स्वाश्रितैः सह, नाशश्चोरादिभ्य एतास्तिस्रो वित्तस्य द्रव्यस्य गतयो भवन्ति। तत्र प्रकारत्रैविध्यमाह। यः पुरुषः सत्पात्रेभ्यो न ददाति स्वयं न भुङ्क्ते उपभोगं न कुरुते तस्य पुरुषस्य द्रव्यस्य तृतीया गतिर्नाशो भवति। तस्मात्सति धने पुरुषेण नाशभयाद्दानभोगाववश्यं कर्तव्याविति व्यज्यते। आर्या वृत्तम् ॥

याचकेषु बहुदानं कुर्वन्संपदा क्षीणोऽपि जनो विशेषेण शोभत इति मण्यादिदृष्टान्तोपन्यासपूर्वकमाह—

मणिः शाणोल्लीढः समरविजयी हेतिनिहतो
मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः।
कलाशेषश्चन्द्रः सुरतमृदिता बालललना-
स्तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु जनाः ॥ ४४ ॥

मणिरिति ॥ शाणो घर्षणप्रस्तरस्तत्रोल्लीढो घर्षितः। कृशीकृत इति यावत्। मणिर्हीरकादिः, हेतिना खड्गादिना निहतः कृतक्षतः समरविजयी सङ्ग्रामे जयशीलो योद्धा, मदेन गजमदेन क्षीणो नागो हस्ती, शरदि शरत्काले श्यानानि संकुचितानि। शुष्काणीति यावत्। पुलिनानि वालुकामयप्रदेशा यासु

ताः सरितो नद्यः, कलया षोडशभागेन शेषोऽवशिष्टश्चन्द्रः, सुरते पुरुषेण मृदिता आलिङ्गनचुम्बनादिनोपमर्दिताङ्गी बालवनिता नवयौवना स्त्री, एवमर्थिषु याचकेषु गलितः संक्रामितो विभव ऐश्वर्यं यैस्ते एवंविधा जनाः । "नृपाः" इत्यपि पाठः । तनिम्ना कार्श्येन । क्षीणत्वेनेति यावत् । अनेन पुरुषेण दानमवश्यं कर्तव्यमिति बोधितमिति भावः । शिखरिणी वृत्तम् ॥

वस्तुनो लघुत्वमहत्त्वहेतुरवस्थैव नान्यदित्याह—

परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये
स पश्चात्संपूर्णो गणयति धरित्रीं तृणसमाम् ।
अतश्चानैकान्त्याद्गुरुलघुतयाऽर्थेषु धनिना-
मवस्था वस्तूनि प्रथयति च संकोचयति च ॥ ४५ ॥

परिक्षीण इति ॥ कश्चिदेकः पुरुषः परिक्षीणो दरिद्रः सन् यवानां प्रसृतये अर्धाञ्जलिपरिमितधान्यार्थं स्पृहयति स्पृहां करोति । दरिद्रावस्थायां तामेव यवप्रसृतिं महतीं मन्यत इत्यर्थः । स एव पश्चादनन्तरं धनादिभिः संपूर्णः परिपूर्णः सन् धरित्रीं पृथ्वीं तृणसमां तृणतुल्यां गणयति गणनां करोति । धनिकावस्थायां पृथ्वीमपि तुच्छां मन्यत इत्यर्थः । अतो हेतोः अवस्थैव गुरुलघुतया गुरुत्वेन लघुत्वेन च वस्तूनि प्रथयति विस्तारयति संकोचयति च । ननु अर्थेषु स्वरूपतो गुरुत्वं लघुत्वं चास्ति किमवस्थयेत्याशङ्क्याह । धनिनामिति । धनिनामर्थेषु विषये अनैकान्त्यात् स्वरूपतो गुरुत्वलघुत्वयोः परस्परव्यभिचारात् । यत्र स्वरूपतो लघुः स दरिद्रावस्थायां गुरुर्भवति । यत्र स्वरूपतो गुरुः स धनिकावस्थायां लघुर्भवत्यतोऽवस्थैव गुरुत्वलघुत्वकारिणीति भावः । शिखरिणी वृत्तम् ॥

राज्ञां पृथ्वीपालनप्रकारं बोधयति—

राजन् दुधुक्षसि यदि क्षितिधेनुमेनां
तेनाद्य वत्समिव लोकममुं पुषाण ।
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः ॥ ४६ ॥

अनेन पृथ्वीदोहनपूर्वकं प्रजापालनमेव राज्ञा कर्तव्यमिति तंप्रति नीतिर्बोधितेति । वसन्ततिलका वृत्तम् ॥

राजनीतिर्नैकविधा किंत्वनेकविधाऽस्तीति वेश्यादृष्टान्तेन वर्णयति—

सत्याऽनृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वेश्याङ्गनेव नृपनीतिरनेकरूपा ॥ ४७ ॥

सत्येति ॥ क्वचित्सत्या सत्यमिश्रा । क्वचिदिति सर्वत्र योजनीयम् । अनृता असत्यमिश्रा, परुषा निष्ठुरा, "निष्ठुरं परुषं ग्राम्यम्" इत्यमरः । प्रियवादोऽस्यामस्तीति प्रियवादिनी । प्रियभाषणयुक्तेत्यर्थः । हिंस्रा घातुका, "शरारुर्घातुको हिंस्रः" इत्यमरः । दयालुर्दयाशीला, अर्थपरा धनतत्परा, वदान्या दानशौण्डा, "स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे" इत्यमरः । नित्यं व्ययो धनापगमो यस्याम् । प्रचुरोऽधिको नित्यं धनागमो धनप्राप्तिर्यस्याम् । वेश्याङ्गनेव पण्यस्त्रीव नृपनीती राजनीतिरनेकरूपाऽनेकप्रकारा अस्ति । समये समये सत्यभाषणादियुक्ता यथा वेश्याऽनेकप्रकारा तथा राजनीतिरप्यनेकप्रकारेति भावः । पूर्वोक्तमेव वृत्तम् ॥

आज्ञादिषड्गुणा राजपुरुषेऽपेक्षितास्तद्विना तेषां राजाश्रयो व्यर्थ इत्याह—

आज्ञा कीर्तिः पालनं ब्राह्मणानां
दानं भोगो मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः
कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ ४८ ॥

आज्ञेति ॥ दुर्जनानां आज्ञा शासनं "निदेशः शासनं च सः । शिष्टिश्चाज्ञा" इत्यमरः। कीर्तिर्यशः सर्वदिक्षु, ब्राह्मणानां पालनं रक्षणं, दानं सत्पात्रेभ्यः, भोगः स्रक्ताम्बूलादेः स्वस्मिन्, आपद्भ्यो मित्राणां संरक्षणं च एते पूर्वोक्ताः षड्गुणा येषां न प्रवृत्ता न प्राप्ताः तेषां पार्थिवस्य राज्ञ उपाश्रयेणाश्रयेण कोऽर्थः किं प्रयोजनं । किमपीत्यर्थः । शालिनी वृत्तम् ॥ "शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः" इति तल्लक्षणात् ॥

स्वप्रारब्धसंचितमर्थं पुरुषा लभन्ते नाधिकमिति घटदृष्टान्तेनाह—

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् ।

तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः ।
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥ ४९ ॥

यद्धात्रेति ॥ धात्रा ब्रह्मणा निजभालपट्टे स्वकपाले लिखितं स्तोकं लघु महद्वृहद्वा यद्धनं तन्मरुस्थलेऽपि निर्जलदेशेऽपि प्राप्नोति । ततो लिखिताद्धिकं मेरौ काञ्चनगिरावपि न प्राप्नोति । तत्तस्मात् धीरो भव धैर्यमालंब्य तिष्ठ । वित्तवत्सु धनिषु कृपणां दीनां वृत्तिं जीविकां वृथा व्यर्थं मा कृथा मा कुरु । हे जन त्वं पश्य । घटः कूपे स्वल्पोदके पयोनिधावपि तुल्यं स्वप्रमाणानुरूपं जलं गृह्णाति । नाधिकमित्यर्थः । धनेच्छुना पुरुषेण लाभस्य प्रारब्धाधीनत्वाद्धनिषु कृपणया वृत्त्या न वर्तितव्यमिति तात्पर्यम् । शार्दूलविक्रीडितं वृत्तम् ॥

स्वाश्रिते जने तद्दैन्योक्तिप्रतीक्षा न कर्तव्येति मेघान्योक्त्या दर्शयति—

त्वमेव चातकाधारोऽसीति केषां न गोचरः ।
किमम्भोदवराऽस्माकं कार्पण्योक्तिं प्रतीक्षसे ॥ ५० ॥

त्वमेवेति ॥ हे अम्भोदवर हे मेघश्रेष्ठ, अस्माकं चातकानां कार्पण्योक्तिं दैन्योक्तिं किं प्रतीक्षसे इमे दीना भूत्वा मां प्रार्थयिष्यन्ति तदाऽहं वृष्टिं करोमीति किमिच्छसि यतस्त्वमेव चातकानां पक्षिविशेषाणामाधार आश्रयोऽसीति केषां गोचरः प्रत्यक्षं न किंतु सर्वेषामस्तीति । तस्मात्स्वाश्रितजनदैन्योक्तिप्रतीक्षाकरणमनुचितमिति भावः । अनुष्टुब् वृत्तम् ॥

पुरुषेण कस्यापि पुरतो दीनवचनं न वक्तव्यमिति चातकान्योक्त्या दर्शयति—

रेरे चातक सावधानमनसा मित्र क्षणं श्रूयता-
मम्भोदा बहवो हि सन्ति गगने सर्वे तु नैतादृशाः ।
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥ ५१ ॥

रेरे चातकेति ॥ रेरे इति वीप्सा नीचसंबोधने । हे चातक हे मित्र, सावधानमनसा अव्यग्रचित्तेन क्षणं क्षणमात्रं श्रूयताम् । हि यस्माद्गगने अम्भो जलं ददातीत्यम्भोदा मेघा बहवः सन्ति परंतु सर्वे एतादृशाः करुणावन्तो न । पुनः केचिद्वृष्टिभिर्वर्षणैर्वसुधां पृथ्वीमार्द्रयन्ति जलयुक्तां कुर्वन्ति । केचिद्वृथा व्यर्थं गर्जन्ति गर्जनां कुर्वन्ति न वर्षन्ति । तस्माद्यं यं मेघं पश्यसि तस्य तस्य पुरतोऽग्रे दीनं वचो याच्यं मा ब्रूहि मा वद । अनेन ये दान-

शीलास्तान्प्रति याचना कर्तव्या नेतरान्प्रतीति सूचितमिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥

दुर्जनस्य स्वभावसिद्धलक्षणमाह—

अकरुणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा ।
स्वजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम्॥५२॥

अकरुणेति ॥ सर्वप्राणिषु अकरुणत्वं निर्दयत्वम् । अकारणविग्रहः कारणं विना वैरम् । परस्य धने द्रव्ये तथा परस्य योषिति स्त्रियां स्पृहेच्छा । स्वजनाः बन्धुजनाश्च तेषु सहिष्णोर्भावः सहिष्णुता न सहिष्णुता असहिष्णुता असहनता । दुरात्मनां दुर्जनानामिदं पूर्वोक्तं दोषचतुष्टयं प्रकृत्या स्वभावेन सिद्धं । नान्यतः प्राप्तमित्यर्थः । द्रुतविलम्बितं वृत्तम् । "द्रुतविलम्बितमाह नभौ भरौ" इति तल्लक्षणात् ॥

विद्यालङ्कृतस्यापि दुर्जनस्य संगो न कर्तव्य इति सर्पदृष्टान्तेनाह—

दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ ५३ ॥

दुर्जन इति ॥ दुर्जनोऽसज्जनो विद्ययाऽलङ्कृतोऽपि सन् परिहर्तुं त्यक्तुं योग्यः परिहर्तव्योऽस्ति । न सहवासयोग्य इत्यर्थः । तत्र दृष्टान्तः । असौ प्रसिद्धः सर्पः मणिना भूषितोऽपि भयं करोतीति भयंकरः "मेघर्तिभयेषु कृञः" इति खच् । "अरुर्द्विष—" इति मुम् । न किं अपि तु भयंकर एव । मणिना भूषितोऽपि सर्पो यथा भयंकरस्तथा विद्वानपि दुर्जनोऽतस्तस्य संगः सर्वथा न कर्तव्य इति भावः । अनुष्टुब् वृत्तम् ॥

गुणिनां सर्वे गुणा दुर्जनैर्दोषत्वेनैव गण्यन्ते इति वक्तुं तत्तद्गुणेषु तत्तद्दोषारोपप्रकारमाह—

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणता ऋजौ विमतिता दैन्यं प्रियालापिनि ।
तेजस्विन्यवलिप्तता मुखरिता वक्तर्यशक्तिः स्थिरे
तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः ॥ ५४ ॥

जाड्यमिति ॥ ह्रीर्लज्जास्तीति तस्मिन्पुरुषे जडस्य भावो जाड्यमारोपयन्तीति शेषः । एवमेवोत्तरत्रापि यथायथं बोध्यम् । व्रते रुचिः प्रीतिर्यस्य तस्मिन्पुरुषे दम्भः परप्रतारणार्थमनुष्ठानम् । शुचौ शुद्धपुरुषे कितवस्य धूर्तस्य

भावः । कैतवं धूर्तता, शूरे शौर्यादिगुणयुक्ते निर्घृणता निर्दयता ऋजौ सरले विमतिता बुद्धिहीनता, प्रियमालपति तच्छीले पुरुषे दैन्यं दीनता, तेजस्विनि तेजोविशिष्टे अवलिप्तता गर्विष्टता, "अवलेपस्तु गर्वे स्यात्लेपने भूषणेऽपि च" इति मेदिनी। वक्तरि वचनपटौ निन्दितमुखमस्य तस्य भावो मुखरता अबद्धमुखरता। अबद्धवक्तृत्वमिति यावत्। "दुर्मुखे मुखराबद्धौ" इत्यमरः। स्थिरे निश्चले अशक्तिः शक्तिराहित्यम्। तत्तस्मात् गुणिनां को नाम स गुणो भवेत्। यो दुर्जनैर्दुष्टजनैर्नाङ्कितोऽनारोपितदोष इत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥

हेयोपादेयतया दोषान्गुणांश्च दर्शयति—

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्।
सौजन्यं यदि किं निजैः सुमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥ ५५ ॥

लोभश्चेदिति ॥ लोभः प्राप्तेऽप्यर्थेऽधिकप्राप्तीच्छा चेत् अगुणेन गुणराहित्येन किम्। एकस्मिन्लोभे सति सर्वगुणानां व्यर्थत्वादित्यर्थः। तदुक्तं भागवते "यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः। लोभः स्वल्पोऽपि तान्हन्ति श्वित्रो रूपमिवेप्सितम्" इति। पिशुनस्य दुर्जनस्य भावः पिशुनता दुर्जनता। "पिशुनो दुर्जनः खलः" इत्यमरः। सर्वेषां पापानां पिशुनतायामेवान्तर्भावादित्यर्थः। सत्यं यथार्थभाषणं चेत्तपसा कृच्छ्रचान्द्रायणादिना किम्। सत्येनैव कृच्छ्रादिफलप्राप्तेरित्यर्थः। तदुक्तं श्रुतौ "सत्यं परं पर९ सत्य९ सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचन सता९ हि सत्यं तस्मात्सत्ये रमन्ते। सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदन्ति इति। यदि मनोन्तःकरणं शुचि शुद्धं चेत्तीर्थेन तीर्थस्नानेन किम्। तीर्थस्नानजन्यफलस्य तेनैव जननादित्यर्थः। सुजनस्य भावः सौजन्यं यदि चेत् निजैरात्मीयैः किम्। सुजनतया सर्वेषामात्मीयत्वसंपादनादित्यर्थः। "गुणैः" इति पाठे इतरैर्गुणैरित्यर्थः। सौजन्येनैवेतरगुणानां कार्यकरणादित्यर्थः। यदि सुष्ठु महिमा माहात्म्यम्। ऐश्वर्यमिति यावत्। चेत् मण्डनैरितरभूषणैः किम्। तस्यैव सर्वभूषणकार्यकारित्वादित्यर्थः। यदि सद्विद्या उत्तमविद्या चेत् धनैः किम्। सर्वधनेषु विद्याधनस्य प्राधान्यादित्यर्थः। यद्यपयशोऽपकीर्तिश्चेन्मृत्युना किम्। तस्यैव मृत्युकार्यकारित्वादित्यर्थः। पूर्वोक्तं वृत्तम् ॥

दुष्परिहराणि मानसिकानि दुःखानि कथयितुं तानि गणयित्वा दर्शयति—

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे ॥ ५६ ॥

शशीति ॥ शशी चन्द्रो दिवसे धूसरः प्रभाहीनः, कामिनी स्त्री गलितं नष्टं यौवनं यस्याः सा, सरः सरोवरं विगतं वारिजं कमलं यस्मात्तत्, शोभना आकृतिः करचरणाद्यवयवो यस्य तस्य मुखमाननं न विद्यन्ते अक्षराणि वर्णा यस्मिन्तत् । अक्षररहितमित्यर्थः । प्रभुः स्वामी धने परायणस्तत्परः, सज्जनः साधुजनः सततं निरन्तरं दुर्गतो दारिद्र्यं प्राप्तः खलो दुर्जनः नृपस्य राज्ञोऽङ्गने चत्वरे गतः प्राप्तः, "अङ्गनं चत्वराजिरे" इत्यमरः । एतानि सप्त शल्यानि मे मनसि वर्तन्ते । पृथ्वी वृत्तम् । लक्षणं पूर्वमुक्तमेव ॥

अत्यन्तकोपाविष्टानां राज्ञां स्वीयः कोऽपि नास्तीत्यग्निदृष्टान्तेनाह—

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ।
होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥ ५७ ॥

न कश्चिदिति ॥ चण्डोऽत्यन्तः कोपः क्रोधो येषां तेषां भुवं भुञ्जन्ति ते भूभुजो राजानस्तेषामात्मीयः स्वकीयः कश्चित्कोऽपि नास्ति । नामेति प्रसिद्धम् । तत्र दृष्टान्तः, जुहोति हविर्ददातीति जुह्वानस्तं होतारमपि तेन स्पृष्टः कृतस्पर्शः पावकोऽग्निर्दहत्येव न तु तमुपेक्षत इत्यर्थः । तथा राजानोऽपीति भावः । अनुष्टुब् वृत्तम् ॥

सेवाधर्मोऽतिकठिन इत्याह—

मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे वसति च तदा दूरतश्चाप्रगल्भः ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ५८ ॥

मौनान्मूक इति ॥ सेवाधर्मः परममत्यन्तं गहनो दुरधिगमोऽस्ति । यतो योगिनामप्यगम्यो ज्ञातुमशक्यः । तमेवाह । मौनान्मौनधारणान्मूकोऽस्तीत्युच्यत इति शेषः । एवमेवाग्रेऽपि । मौनधारिणं पुरुषं मूकत्वेन गणयन्तीत्यर्थः । प्रवचने पटुः समर्थश्चेत् वातं न सहते वातुलो वातरोगी । "वातूलो वातुलोऽपिस्यात्" इति द्विरूपकोशाद्रूस्वमध्योऽपि । वातमुखसेवनयोरदन्तः । बाहुल्यकादुल-

जिति रामाश्रमीकारः । "वातुलो वातलेऽपि स्यात्" इति हेमचन्द्रः । अथवा जल्पको वाचालः । वाग्मिनं पुरुषं वाचालत्वेन वातरोगित्वेन वा गणयन्तीत्यर्थः । पार्श्वे पार्श्वभागे वसति चेत् धृष्टोऽविनीतः । "धृष्टे धृष्णुर्वियातश्च" इत्यमरः । लज्जारहितो वा । "स्यादधृष्टे तु शालीनः" इत्यमरकोशेऽधृष्टशब्देन सलज्जस्य ग्रहणादर्थाद्धृष्टशब्देन निर्लज्जस्य ग्रहणम् । सर्वदा समीपे वसन्तं पुरुषं धृष्टत्वेन निर्लज्जत्वेन गणयन्तीत्यर्थः । दूरतो वसतीति पूर्वस्यैवानुषङ्गः । चेत् तदा अप्रगल्भोऽप्रौढः । दूरे वसन्तं पुरुषमप्रौढत्वेन गणयन्तीत्यर्थः । क्षान्त्या क्षमया युक्त इति शेषः । चेत् भीरुर्भयशीलः । क्षमाशीलं पुरुषं भीरुत्वेन गणयन्तीत्यर्थः । यदि न सहते तदा प्रायशो बाहुल्येन नाभिजातः अज्ञोऽकुलीनो वा । "अभिजातस्तु कुलजे बुधे" इत्यमरः । असहनशीलं पुरुषमज्ञत्वेनाकुलीनत्वेन गणयन्तीत्यर्थः । मन्दाक्रान्ता वृत्तम् । "मन्दाक्रान्ता जलधिषडगैर्म्भौ न तौ ताद्गुरू चेत्" इति तल्लक्षणात् ॥

नीचसेवाकारिणः सुखिनो न भवन्तीत्याह—

उद्भासिताखिलखलस्य विशृङ्खलस्य
प्राग्जातविस्तृतनिजाधमकर्मवृत्तेः ।
दैवादवाप्तविभवस्य गुणद्विषोऽस्य
नीचस्य गोचरगतैः सुखमाप्यते कैः ॥ ५९ ॥

उद्भासितेति ॥ उद्भासिताः प्रकाशिताः अखिलाः खला येन तस्य विशृङ्खलस्य प्रतिबन्धरहितस्य प्राग्जातं पूर्वजन्मनि जातमिदानीं विस्तृतं निजं स्वकीयमधमं निन्द्यं कर्म तस्मिन्वृत्तिर्वर्तनं यस्य, दैवाददृष्टादवाप्तः प्राप्तो विभव ऐश्वर्यं येन तस्य, गुणान् द्वेष्टीति गुणद्विट् तस्यास्य नीचस्य जनस्य गोचरगतैश्चक्षुर्विषयगतैः कैः पुरुषैः सुखमाप्यते प्राप्यते । न कैश्चिदित्यर्थः । वसन्ततिलका वृत्तम् ॥

खलसज्जनयोर्मित्रता दिनपूर्वार्धपरार्धविभागसंबन्धिच्छायेव संकोचविकासशालिन्यस्तीति दर्शयति—

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥ ६० ॥

आरम्भगुर्वीति ॥ आरम्भे गुर्वी महती, क्रमेण क्षयिणी प्रतिक्षणं क्षयशीला, पुरा पूर्वं लघ्वी, पश्चात् वृद्धिरस्या अस्तीति वृद्धिमती, दिनस्य दिवसस्य पूर्वार्धे च परार्धे च ताभ्यां भिन्ना, छायेव खला दुर्जनाश्च सज्जनाः साधवश्च

तेषां मैत्री मित्रता भवति । यथा दिनपूर्वार्धे आरम्भे छाया महती क्रमेण दिनवृद्ध्या क्षयिणी तथा खलानां मैत्री आरम्भे महती परिणामे लघ्वी भवतीत्यर्थः । यथा दिनपरार्धे आरम्भे लघ्वी छाया पश्चाद्दिनह्रासे वृद्धिमती भवति तथा सज्जनानां मैत्री आरम्भे लघ्वी परिणामे क्रमेण महती भवतीति भावः । उपजातिर्वृत्तम् ॥

पिशुनाः कारणंविना जगति वैरिणो भवन्तीति लुब्धकधीवरदृष्टान्तपूर्वकं दर्शयति—

मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ ६१ ॥

मृगमीनेति ॥ जगति लोके लुब्धको व्याधः "व्याधो मृगवधाजीवो मृगयुर्लुब्धकश्च सः" इत्यमरः । धीवरः कैवर्तः "कैवर्ते दासधीवरौ" इत्यमरः । पिशुनो दुर्जनस्ते च निष्कारणं कारणं विना वैरिणः शत्रवो भवन्ति । केषामित्याकाङ्क्षायामाह । मृगमीनेति । तृणं च जलं च संतोषश्च तैर्विहिता वृत्तिर्जीविका येषां तेषाम् "वृत्तिर्वर्तनजीवने" इत्यमरः । मृगा हरिणाश्च मीना मत्स्याश्च सज्जना साधवश्च तेषाम् । अत्र लुब्धकधीवरौ दृष्टान्तभूतौ पिशुनश्च दार्ष्टान्तिकभूतः । तथा च यथा लुब्धकधीवरौ मृगमीनयोर्निष्कारणवैरिणौ तथा पिशुनः सज्जनानां निष्कारणवैरी भवतीति तात्पर्यम् । आर्या वृत्तम् ॥

वाञ्छादिगुणविशिष्टा नरा अतिपूज्या भवन्तीति दर्शयन्नाह—

वाञ्छा सज्जनसंगमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
येष्वेते निवसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥ ६२ ॥

वाञ्छेति ॥ एते पूर्वोक्ता निर्मला निर्दोषा गुणा येषु निवसन्ति तिष्ठन्ति तेभ्यो नरेभ्यो नमो नमस्कारोऽस्तु । ते नरा नमस्कारार्हाः । पूज्या इत्यर्थः । एते के तानाह—वाञ्छेति । सज्जनानां साधूनां संगमे सहवासे वाञ्छा इच्छा, परेषां गुणस्तस्मिन्प्रीतिरभिरुचिः, गुरौ नम्रता नम्रत्वम्, विद्यायां वेदशास्त्रादिविद्यायां व्यसनमासक्तिः, "व्यसनं त्वशुभे सक्तौ" इति मेदिनी । स्वस्याऽऽत्मनो योषिति स्त्रियां रतौ रागः "रतिः स्मरस्त्रियां रागे" इति हेमचन्द्रः । लोके अपवादो निन्दा तस्माद्भयं भीतिः, "अपवादो तु निन्दाज्ञे" इत्यमरः । शूलिनि शिवे, "शिवः शूली महेश्वरः" इत्यमरः । भक्तिः परमानुरक्तिः "भक्तिः

परानुरक्तिरीश्वरे" इति शाण्डिल्यसूत्रात्। आत्मनो मनसो दमने निग्रहे शक्तिः सामर्थ्यम्, खले दुर्जने संसर्गः सहवासस्तस्य मुक्तिस्त्याग इति। शार्दूलविक्रीडितं वृत्तम् ॥

महतां स्वभाव सिद्धान् गुणानाह—

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ६३

विपदीति ॥ इदं पूर्वोक्तं सर्वं महात्मनां महतां प्रकृत्या स्वभावेन सिद्धं निष्पन्नं। न त्वन्यतः शिक्षितमित्यर्थः। इदं किम्। विपदि विपत्तौ धीरस्य भावो धैर्यं धीरत्वम्, अथाभ्युदये ऐश्वर्ये क्षमा क्षान्तिः, सदसि सभायां वाक्पटुता वाक्पाटवम्, युधि सङ्ग्रामे विक्रमः पराक्रमः, यशसि सत्कीर्तावभिरुचिः प्रीतिः, श्रुतौ वेदादिषु व्यसनमासक्तिरिति। द्रुतविलम्बितं वृत्तम् ॥

साधूनां महत्त्वमेव प्रकारान्तरेणाह—

प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं नाप्युपकृतेः ।
अनुत्सेको लक्ष्म्या निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ६४ ॥

प्रदानमिति ॥ प्रदानं ब्राह्मणेभ्यो दानं प्रच्छन्नं गुप्तं। न तु प्रसिद्धमित्यर्थः। गृहमुपगते प्राप्तेऽतिथौ संभ्रमविधिरादरविधानम्, "संभ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपि" इति मेदिनी। प्रियं हितं कृत्वा मौनं तूष्णीमवस्थानं। वाचाऽनुद्घाटनमित्यर्थः। उपकृतेरुपकारस्यापि। अपिः समुच्चये। सदसि सभायां न कथनं कथनाभावः। स्वयं कृतस्याप्युपकारस्यानुद्घाटनमित्यर्थः। लक्ष्म्याः संपत्तेरनुत्सेकोऽगर्वः। सत्यां संपत्तौ गर्वाभाव इत्यर्थः। परेषां कथाः निरभिभवोऽभिभवरहितः सारः सारांशो यासु ताः। "चिरविभवसाराः" इति पाठे चिरं विभव एव सारो यासु ताः। इदं पूर्वोक्तं सतां विषममसिधाराव्रतं केनोद्दिष्टमिति। एतस्य व्याख्यानमष्टाविंशतिश्लोके कृतमस्ति। शिखरिणी वृत्तम्। लक्षणं तूक्तमेव ॥

सत्पात्रे दानाद्येव महतां भूषणं नान्यदिति दर्शयति—

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयिभुजयोर्वीर्यमतुलम्।
हृदि स्वच्छा वृत्तिः श्रुतमधिगतैकमतफलं
विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ६५ ॥

करे इति ॥ इदं पूर्वोक्तं ऐश्वर्येण विनापि ऐश्वर्यमन्तरापि प्रकृत्या स्वभावेन महान्तस्तेषां मण्डनं भूषणं नान्यदित्यर्थः । इदं किम् । करे हस्ते श्लाघ्यः स्तुत्यस्त्यागः सत्पात्रे दानं । तदेव हस्तभूषणं । न तु कैतवादिभ्यो दानमित्यर्थः । एवमुत्तरत्राऽपि बोध्यम् । शिरसि मस्तके गुरोः पादयोः प्रणयिता नम्रता । गुरुपादयोर्मस्तकस्य नम्रीकरणमित्यर्थः । मुखे सत्या यथार्था वाणी, भुजयोर्बाह्वोर्विजयि जयशीलमतुलमनुपमं वीर्यं बलम्, हृदि अन्तःकरणे स्वच्छा निर्मला वृत्तिर्वर्तनम्, अधिगतं प्राप्तमेकं मुख्यं व्रतमीश्वरप्राप्तिचिन्तनरूपो नियमः स एव तस्य फलं वा येन तत् एवंविधं श्रुतं शास्त्राद्यध्ययनम्, शास्त्राध्ययनस्य मुख्यं फलमीश्वरज्ञानमिति तात्पर्यम् । शिखरिणी वृत्तम् ॥

संपदापदोर्महतामन्तःकरणस्थितिमाह—

संपत्सु महतां चित्तं भवत्युत्पलकोमलम् ।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥ ६६ ॥

संपत्स्विति ॥ महतां चित्तमन्तःकरणं संपत्सु संपत्तिषु उत्पलवत्कमलवत्कोमलं मृदु भवति, उत्सेकरहितमित्यर्थः । आपत्सु च महांश्चासौ शैलः पर्वतस्तस्य शिलानां संघातः समूहस्तद्वत्कर्कशं कठिनं विपत्काले धीरत्वं भजत इत्यर्थः । अनुष्टुब् वृत्तम् ॥

संसर्गवशादेव गुणवैचित्र्यं भवतीत्युदकदृष्टान्तेन दर्शयति—

संतप्तायसि संस्थितस्य पयसो नामाऽपि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते ॥ ६७ ॥

संतप्तेति ॥ संतप्ते अयसि लोहे संस्थितस्य पयसो जलस्य नामाऽपि न ज्ञायते, "श्रूयते" इति पाठेऽपि स एवार्थः । संतप्तलोहसंपर्काज्जलं समूलं नश्यतीत्यर्थः । तदेव जलं नलिन्याः कमलिन्याः पत्रे पर्णे स्थितं सन्मुक्ताकारतया राजते शोभते । नलिनीपत्रसंसृष्टं तदेव मौक्तिकवद्भासत इत्यर्थः । तदेव स्वात्यां स्वातीनक्षत्रे सागरे समुद्रे या शुक्तिस्तस्या मध्ये पतितं सन्मौक्तिकं जायते । शुक्तिसंसर्गात्तदेव मौक्तिकं भवतीत्यर्थः । एवं प्रायेण प्रायशोऽधममध्यमोत्तमगुणः संसर्गतः सहवासाज्जायते । यथा तप्तलोहसंसर्गादेकस्यैवोदकस्य परिणामे वैचित्र्यं भवति तथाऽधमादिसहवासाद्गुणवैचित्र्यं भवति ।

तस्मात्पुरुषैरुत्तमसंसर्गः कर्तव्यो नाधममध्यमयोरिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥

आचरणवशात्पुत्रादिलक्षणमाह—

> यः प्रीणयेत्सुचरितैः पितरं स पुत्रो
> यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
> तन्मित्रमापदि सुखे च समक्रियं य-
> देतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ ६८ ॥

यः प्रीणयेदिति ॥ यत् एतत्पूर्वोक्तं त्रयं जगति लोके पुण्यकृतः सुकृतिनो लभन्ते प्राप्नुवन्ति नान्य इत्यर्थः । एतत्त्रयं किम् । यः सुचरितैः शोभनाचरणैः पितरं जनकं प्रीणयेत्संतोषयेत्स एव पुत्रो नान्य इत्यर्थः । यद्भर्तुरेव हितं प्रियमिच्छति तदेव कलत्रं भार्या नान्येत्यर्थः । "कलत्रं श्रोणिभार्ययोः" इत्यमरः । यदापदि विपत्तौ सुखे च समा समाना क्रिया यस्य तदेव मित्रं नान्यदित्यर्थः । वसन्ततिलका वृत्तम् ॥

प्रवृत्तिनिवृत्तिमार्गभेदेन मुख्यान्देवादीनेव सुखहेतूनाह—

> **एको देवः केशवो वा शिवो वा ह्येकं मित्रं भूपतिर्वा यतिर्वा ।**
> **एको वासः पत्तने वा वने वा ह्येका भार्या सुंदरी वा दरी वा॥६९॥**

एक इति ॥ केशवो विष्णुर्वाऽथवा शिवः शंकरो वा एको मुख्यो देवो ध्येय इति शेषः । एवमुत्तरत्रापि यथायोग्यो योज्यः । हिः पादपूर्णे । प्रवृत्तिमार्गे निवृत्तिमार्गे चोभयोरपि सुखजनकत्वादित्यर्थः । भूपती राजा वा यतिः संन्यासी वा एकं मुख्यं मित्रं नान्यदित्यर्थः । उभयत्रोभयोर्मित्रकार्यकारित्वादिति भावः । पत्तने नगरे वा वनेऽरण्ये वा एको मुख्यो वासो वसतिर्नान्यत्रेत्यर्थः । प्रवृत्तौ नगरे निवृत्तावरण्ये वासः सुखद इति भावः । सुंदरी रमणी वा दरी पर्वतगुहा वा एका मुख्या भार्या पत्नी नान्येत्यर्थः । प्रवृत्तौ सुंदरस्त्री निवृत्तौ गुहा च सुखदेति भावः । शालिनी वृत्तम् । लक्षणं तूक्तमेव ॥

नम्रत्वादिगुणैः साधवो जगति पूज्या भवन्तीत्याह—

> **नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान्गुणान्ख्यापयन्तः**
> **स्वार्थान्संपादयन्तो विततपृथुतरारम्भयत्नाः परार्थे ।**
> **क्षान्त्यैवाऽऽक्षेपरूक्षाक्षरमुखरमुखान् दुर्मुखान्दूषयन्तः**
> **सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥७०॥**

नम्रत्वेनेति ॥ नम्रस्य भावो नम्रत्वं तेनोन्नमन्त उन्नतिं गच्छन्तः । जगति यद्वस्तु नम्रीभूतं तदुन्नतिं न गच्छति सन्तस्तु नम्रीभावेनोन्नतिं गच्छन्ति । इदमेवाश्चर्यमिति भावः । एवमेवोत्तरत्रोहनीयम् । तथा परेषां गुणास्तेषां कथनैः स्वान्स्वकीयान् गुणान् ख्यापयन्तः प्रकाशयन्तः सन्तः स्वार्थान्संपादयन्तः । तथा परेषामर्थे विततपृथुतरारम्भयत्नाः आरभ्यन्त इत्यारम्भाः कर्तव्यकृत्यानि । महान्तश्च ते आरम्भाश्च महारम्भास्तेषु यत्नः । पृथुतरश्चासौ महारम्भयत्नश्च । विततो विस्तृतः । सर्वत्र प्रख्यात इति यावत् । पृथुतरोऽतिशयेन महान् एतादृशो महारम्भयत्नो येषां ते । परार्थे कर्तव्यकृत्येष्वतिशयेन यत्नकारिण इत्यर्थः । तथा आक्षेपेण भर्त्सनेन रूक्षाण्यक्षराणि वर्णास्तैर्मुखरं वाचालं मुखं येषां तान् "आक्षेपो भर्त्सनाकृष्टिः" इति मेदिनी । दुर्मुखान् दुष्टान् क्षान्त्या क्षमयैव दूषयन्त एतादृशाः आश्चर्येण सहिता चर्या आचरणं येषां ते सन्तः साधवो जगति बहुमता बहुमान्याः सन्तः कस्य नाभ्यर्चनीयाः पूज्या न भवन्ति । अपि तु सर्वेषामपि पूज्या भवन्तीत्यर्थः । स्रग्धरा वृत्तम् । "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्" इति तल्लक्षणात् ॥

परोपकारिणां स्वभावं वृक्षादिदृष्टान्तपूर्वकं वर्णयति—

भवन्ति नम्रास्तरवः फलोद्गमे नवाम्बुभिर्भूमिविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥७१॥

भवन्तीति ॥ सत्पुरुषाः सज्जनाः समृद्धिभिरैश्वर्यैरनुद्धता भवन्ति, परोपकारिणां परानुपकुर्वन्ति ते परोपकारिणस्तेषामेष स्वभाव एवास्ति । तत्र दृष्टान्तावाह—तरवो वृक्षाः फलानामुद्गमे प्रादुर्भावे नम्रा भवन्ति, घना मेघाः नवानि नूतनानि अम्बूनि जलानि तैर्भूमिं विलम्बन्ते इति भूमिविलम्बिनो भवन्ति । यथा फलोद्गमादौ वृक्षादयो नम्रीभवन्ति तथा ऐश्वर्यप्राप्तावपि सत्पुरुषा नम्रीभवन्तीति भावः । वंशस्थं वृत्तम् । "जतौ तु वंशस्थमुदीरितं जरौ" इति तल्लक्षणात् ॥

कर्णादीनां शास्त्रश्रवणादिगुणवतामेव श्रेष्ठत्वमित्याह—

श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां परोपकारैर्न तु चन्दनेन ॥ ७२ ॥

श्रोत्रमिति ॥ श्रोत्रं कर्णः श्रुतेनैव शास्त्रश्रवणेनैव विभाति शोभते । अस्योत्तरत्रापि संबन्धः । कुण्डलेन कर्णभूषणेन न शोभते । तथा पाणिर्हस्तो

दानेन विभाति कङ्कणेन न, तथा करुणापराणां कृपापराणां कायो देहः परेषु उपकारैर्विभाति चन्दनेन न विभाति । तस्माच्छास्त्रश्रवणादिकं पुरुषैरवश्यं कर्तव्यमिति भावः । उपजातिर्वृत्तम् । लक्षणं तूक्तमेव ॥

सन्मित्रलक्षणमाह—

पापान्निवारयति योजयते हिताय
गुह्यं च गूहति गुणान्प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ७३ ॥

पापादिति ॥ सन्तः साधव इदं पूर्वोक्तं सन्मित्रलक्षणं वदन्ति कथयन्ति । इदं किम् । पापात्पापकर्मणो निवारयति निवारणं करोति, हिताय हिताचरणाय योजयते, गुह्यं गोप्यं गूहति गोपयति, गुणान् प्रकटीकरोति, आपद्गतं विपद्गतं काले समये न जहाति न त्यजति, काले द्रव्यादिदानसमये द्रव्यादिकमपि ददाति । वसन्ततिलकावृत्तम् ॥

सन्त इतरप्रार्थनानपेक्षया परहितायोद्योगं कुर्वन्तीति सूर्यादिदृष्टान्तेनाह—

पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहिताभिहिताभियोगाः ॥ ७४ ॥

पद्माकरमिति ॥ सन्तः स्वयं परहितेऽभिहितः कथितोऽभितो योग उपायो युक्तिर्वा येषां ते । यद्वाऽभियोग उत्साहपूर्वको यत्नो येषां ते एवंविधा भवन्तीति शेषः । "योगः संनहनोपायध्यानसंगतियुक्तिषु" इत्यमरः । "उत्साहपूर्वके यत्ने योगः" इति कोशान्तरं च । तत्र दृष्टान्तानाह । नाभ्यर्थितोऽन्येन केनाप्यप्रार्थितः दिनकरः सूर्यः पद्मानां कमलानामाकरं समूहं विकचीकरोति प्रफुल्लं करोति । "प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः" इत्यमरः । नाभ्यर्थित इति सर्वत्र संबध्यते । नाभ्यर्थितश्चन्द्रः कैरवाणां कुमुदानां चक्रवालं मण्डलं विकासयति । नाभ्यर्थितो जलधरो मेघोऽपि जलं ददातीति । पूर्वोक्तमेव वृत्तम् ॥

क्रियाभेदेन सत्पुरुषादीनां चातुर्विध्यमाह—

एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ७५ ॥

एत इति ॥ ये स्वार्थं परित्यज्य त्यक्त्वा परेषामर्थान् घटयन्ति त एते सत्पुरुषा उत्तमपुरुषा भवन्तीति शेषः । एवमुत्तरत्रापि बोध्यम् । तु पुनः ये स्वार्थस्याविरोधेनानुकूल्येन परार्थमुद्यममुद्योगं बिभ्रति ते सामान्याः । मध्यमा इत्यर्थः । ये स्वार्थाय स्वार्थं कर्तुं परहितं निघ्नन्ति नाशयन्ति तेऽमी मानुषेषु मनुष्येषु राक्षसा राक्षसतुल्या विचारशून्याः । अधमा इत्यर्थः । ये निरर्थकं निष्प्रयोजनं परहितं निघ्नन्ति ते के इति न जानीमहे । अतिनिन्द्या इत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥

सतां मैत्री संतापप्राप्तावपि न नश्यतीति पयोदृष्टान्तेनाह—

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः ।
गन्तुं तावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥ ७६ ॥

क्षीरेणेति ॥ सतां साधूनां मैत्री ईदृशी क्षीरनीरसदृश्यखण्डिता । अस्तीति शेषः । तदेव विवृणोति । पुरा पूर्वं क्षीरेण दुग्धेनात्मानं गतं प्राप्तमुदकं जलं तस्मै ते प्रसिद्धा अखिलाः संपूर्णा गुणा माधुर्यादयो दत्ताः । अग्निसंयोगे सति क्षीरे तापमवेक्ष्य दृष्ट्वा तेन पयसा जलेन स्वस्यात्मा देहः कृशानावग्नौ हुतः । तत्तापेन शुष्कमभवदित्यर्थः । तत्क्षीरं मित्रस्य जलस्यापदं जलशोषणरूपामापत्तिं दृष्ट्वा पावकमग्निं गन्तुमुन्मन उत्कण्ठितमभवत् । उत्सिक्तमभूदित्यर्थः । तदेव क्षीरं तेन जलेन युक्तं सत् तु पुनः शाम्यति । उत्सिक्तं दुग्धं जलप्रक्षेपेण शाम्यतीति लोकप्रसिद्धम् । शार्दूलविक्रीडितं वृत्तम् ॥

महात्मानो बहूनामाश्रयभूता भवन्तीति समुद्रान्योक्त्याह—

इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-
मितश्च शरणार्थिनां शिखरिणां गणाः शेरते ।
इतोऽपि वडवानलः सह समस्तसंवर्तकै-
रहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ ७७ ॥

इत इति ॥ इत एकस्मिन्प्रदेशे केशवो विष्णुः स्वपिति निद्राति । इतस्तदीयद्विषां भगवद्वैरिणां दैत्यानां कुलं समूहस्तिष्ठतीति शेषः । इतश्च शरणार्थिनां शरणागतानां शिखरिणां पर्वतानां गणाः समूहाः शेरते । इतोऽपि वडवानलो वडवाग्निः समस्ताः सांवर्तकाः प्रलयकारिणोऽग्नयस्तैः सह तिष्ठति । अहो इत्याश्चर्ये । सिन्धोः समुद्रस्य वपुः शरीरं विततं विस्तृतमूर्जि-

तमतिवलिष्टं भरं भारं सहत इति भरसहं चास्तीति । महात्मानः समुद्रवदुपकारिणामनुपकारिणां च सर्वेषामाश्रयभूता भवन्तीति भावः । पृथ्वी वृत्तम् । लक्षणं तूक्तमेव ॥

तृष्णात्यागादिना साधुत्वं भवतीति जनमुपदिशति—

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय स्वान्गुणा-
न्कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणम् ॥ ७८ ॥

तृष्णामिति ॥ एतत्पूर्वोक्तं सतां साधूनां लक्षणम् । भवतीति शेषः । एतत्किम् । तृष्णां स्पृहां छिन्धि, क्षमां क्षान्तिं भज सेवस्व, पापे पापकर्मणि रतिं रागं मा कृथाः मा कुरु, सत्यं ब्रूहि वद, साधोः सज्जनस्य पदवीं मार्गमनुयाहि अनुगच्छ, विद्वज्जनान्सेवस्व, मान्यान्मानार्हान्मानय, विद्विषोऽप्यनुनय सांत्वय, "प्रणतिः स्यादनुनयः प्रणिपातश्च सांत्वनम्" इति हलायुधः । स्वान्गुणान्प्रख्यापय, कीर्तिं यशः पालय, दुःखिते दयां कुरु । शार्दूलविक्रीडितं वृत्तम् ॥

प्रकारान्तरेणापि साधूनां लक्षणं कथयंस्तेषां दौर्लभ्यमाह—

मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून्पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ ७९ ॥

मनसीति ॥ मनसि अन्तःकरणे, वचसि वाण्यां, काये देहे, पुण्यं सुकृतमेव पीयूषममृतं तेन पूर्णाः परिपूर्णाः । वाक्कायमनोभिः पुण्यमेव संपादयन्ति न पापमित्यर्थः । उपकारश्रेणिभिरुपकारपङ्क्तिभिस्त्रिभुवनं प्रीणयन्तस्तर्पयन्तः । सर्वदोपकारमेव कुर्वन्ति नापकारमित्यर्थः । परेषां गुणास्तेषां परमाणून् पर्वतीकृत्य तत्प्रमाणान्कृत्वा नित्यं निजहृदि स्वहृदये विकसन्तः प्रकाशमानाः । सर्वदा परगुणेष्वेव दत्तदृष्टयो न दोषेष्वित्यर्थः । एवंविधाः सन्तः सज्जनाः कियन्तो द्वित्रा विरलाः सन्तीति । मालिनी वृत्तम् ॥

साधवः स्वनिष्टान्गुणान्परेषु संक्रामयन्तीति मलयान्योक्त्याह—

किं तेन हेमगिरिणा रजताद्रिणा वा
यत्राश्रिताश्च तरवस्तरवस्त एव ।

मन्यामहे मलयमेव यदाश्रयेण
कङ्कोलनिम्बकुटजा अपि चन्दनाः स्युः ॥ ८० ॥

किं तेनेति ॥ यत्राश्रितास्तरवो वृक्षास्ते तरव एव भवन्ति । तेन हेमगिरिणा सुवर्णाचलेन वा अथवा रजताद्रिणा किं, न किमपीत्यर्थः । वयं तु मलयमेव मलयाचलमेव महान्तं मन्यामहे । कुतः । यस्याश्रयेण कङ्कोलाश्च निम्बाश्च कुटजाश्च तेऽपि चन्दनाश्चन्दनवृक्षाः स्युर्भवन्तीति । चन्दनवृक्षवद्भासन्त इत्यर्थः । वसन्ततिलका वृत्तम् ॥

धीराः पुरुषा अवश्यसंपाद्यत्वेन निश्चितमर्थं संपादयितुं यत्नं कुर्वन्तो मध्ये विघ्नैरभिभूता अपि निश्चितार्थप्राप्तिं विना न विरमन्तीत्यमुमर्थं समुद्रमथनप्रवृत्तदेवदृष्टान्तेनाह—

रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः ॥८१॥

रत्नैरिति ॥ धीरा गम्भीराः पुरुषा निश्चितार्थान्निश्चितमर्थमप्राप्य न विरमन्ति न विश्राम्यन्ति । आरब्धं यत्नं न त्यजन्तीत्यर्थः । तत्र दृष्टान्तमाह—रत्नैरिति । देवा महार्हैर्महामूल्यै रत्नैर्न तुतुषुः संतोषं न प्रापुः । अमृतमथनार्थं प्रवृत्ता देवा मध्ये उत्पन्नैरपि रत्नैर्न तुतुषुरित्यर्थः । तथा भीमं घोरं विषं तेन भीतिं भयं न भेजिरे न सिषिवुः । महाभयजनकेनोत्पन्नेन विषेणाऽपि भयं न प्रापुरित्यर्थः । किं तु सुधाममृतं विना विरामं विश्रान्तिं न प्रययुर्न प्रापुः । प्राप्तव्यत्वेन निश्चितार्थरूपसुधाप्राप्तिं विना यत्नं न त्यजन्तीत्यर्थः । उपेन्द्रवज्रा वृत्तम् ॥

स्वकार्ये दत्तदृष्टिर्विवेकी पुरुषो मध्ये प्राप्तं सुखदुःखादिकं न गणयेदिति बोधयन्नाह—

क्वचिद्भूमौ शय्या क्वचिदपि च पर्यङ्कशयनं
क्वचिच्छाकाहारी क्वचिदपि च शाल्योदनरुचिः ।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ ८२ ॥

क्वचिदिति ॥ क्वचित्कदाचिद्भूमौ पृथिव्यां शय्या शयनम् । करोतीति शेषः । एवमुत्तरत्रापि बोध्यम् । क्वचिदपि च पर्यङ्कशयनम्, क्वचिच्छाकाहारी शाकभोजी, क्वचिदपि च शाल्योदने रुचिर्यस्य सः । शाल्योदनभोजीत्यर्थः । क्वचित्कन्थां प्रावरणविशेषं धारयतीति धारी तथाविधः, क्वचिदपि च दिव्यं

च तदम्बरं वस्त्रं तस्य धरो धारकः, कार्यार्थी कार्येच्छुः, प्रशस्तं मनोऽन्तःकरणं यस्य सः । विवेकीति यावत् । एवंविधः पुरुषः दुःखं न गणयति सुखं च न गणयतीति । शिखरिणी वृत्तम् ॥

सुजनतादिसर्वभूषणापेक्षया शीलमेवोत्तमं भूषणमित्याह—

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ ८३ ॥

ऐश्वर्यस्येति ॥ सुजनता सौजन्यमैश्वर्यस्य भूषणमलंकरणम् । भवतीति शेषः । एवमुत्तरत्रापि बोध्यम् । सत्यैश्वर्ये सौजन्यं संपादनीयमित्यर्थः । शौर्यस्य वीर्यस्य वाक्संयमो वाङ्नियमः । शौर्ये सति वाचा तदुद्घाटनं न कार्यमित्यर्थः । ज्ञानस्य तत्त्वज्ञानस्योपशमः शान्तिः । तत्त्वज्ञाने सति शान्तिरवश्यं संपादनीयेत्यर्थः । श्रुतस्यानेकशास्त्रश्रवणस्य विनयो नम्रता । शास्त्रश्रवणेन विनयोऽवश्यं संपादनीय इत्यर्थः । वित्तस्य द्रव्यस्य पात्रे सत्पात्रे व्ययो दानम् । सति वित्ते सत्पात्रे दानमवश्यं कर्तव्यमित्यर्थः । तपसोऽक्रोधः क्रोधराहित्यम् । तपः कुर्वता क्रोधो न कार्य इत्यर्थः । प्रभवितुर्निग्रहानुग्रहसमर्थस्य क्षमा, निग्रहानुग्रहसमर्थेन क्षमाऽवश्यं संपादनीया, धर्मस्य स्वधर्माचरणस्य निर्व्याजता निष्कपटता । दम्भेन स्वधर्माचरणं न कार्यमित्यर्थः । सर्वेषामपि जनानां सर्वेषां गुणानां कारणमिदं शीलं स्वभावः परं श्रेष्ठं भूषणमस्ति । सर्वे एते गुणाः स्वभावानुरोधेन भवन्ति न तु बलात्कारेणेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥

धीरपुरुषा निन्दादिभिर्न्यायमार्गान्न प्रच्यवन्तीत्याह—

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ८४ ॥

निन्दन्त्विति ॥ नीत्यां नये निपुणाः कुशलाः पुरुषा निन्दन्तु निन्दां कुर्वन्तु यदिवा अथवा स्तुवन्तु, लक्ष्मीः संपत् यथेष्टं यथेच्छं समाविशत्वागच्छतु वा गच्छतु, अद्यैव मरणं मृत्युरस्तु युगान्तरेऽन्ययुगे वाऽस्तु, तथाऽपि धीरा गम्भीराः पुरुषा न्यायादनपेतोऽरहितस्तस्मात्पथो मार्गात् न्यायमार्गं विहायाऽन्यत्रैकमपि पदं चरणं न प्रविचलन्ति न गच्छन्ति । अनेन सत्स्वपि निन्दादिषु न्यायमार्गो न हातव्य इति सूचितम् । वसन्ततिलका वृत्तम् ॥

प्रारब्धमेव जनस्य वृद्धिक्षययोः कारणमस्तीति सर्पदृष्टान्तेनाह—

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाऽऽखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
लोकाः पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥ ८५ ॥

भग्नाशस्येति ॥ हे लोकाः यूयं नृणां मनुष्याणां वृद्धावैश्वर्ये क्षये च दैवमेव कारणं हि निश्चितं पश्यत । एतदेव दृष्टान्तेनोपपादयति । केनचिन्मन्त्रिणा सर्पं धृत्वा करण्डे निक्षिप्तस्तस्य स्थितिमाह—करण्डे पीडिता तनुर्देहो यस्यात एव भग्ना नष्टा आशा बहिर्निष्क्रमणाशा यस्य तस्य, क्षुधा क्षुधया कृत्वा म्लानानि क्षीणानीन्द्रियाणि यस्यैवंविधस्य भोगिनः सर्पस्य मुखे आखुर्मूषको विवरं करण्डस्य छिद्रं कृत्वा स्वयं निपतितो न केनाऽपि पातितः । असौ सर्पस्तु तस्य मूषकस्य पिशितेन मांसेन तृप्तः सन् तेनैव मूषकविहितेन पथा मार्गेण सत्वरं बहिर्यातो निर्गतः । यथा करण्डस्थितं सर्पमजानन्मूषकः करण्डस्य बिलं कृत्वाऽन्तः प्रविष्टः स्वादृष्टवशादेव तन्मुखे पतित्वा मृतः । सर्पस्तु स्वादृष्टवशादेव तन्मांसेन तृप्तः सन् तत्कृतेन बिलद्वारेण बहिर्निर्गत्य सुखितोऽभूत्तथा सर्वोऽपि जनः स्वादृष्टवशादेव सुखदुःखादिकं भुङ्क्त इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥

आलस्यं विहायोद्यमकर्ता लोके सुखं प्राप्नोतीत्याह—

आलस्यं हि मनुष्याणां शरीरस्थो महान्रिपुः ।
नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति ॥ ८६ ॥

आलस्यमिति ॥ अलसस्य भाव आलस्यं व्यापाराराहित्यं, मनुष्याणां शरीरे तिष्ठतीति शरीरस्थो महान् रिपुः शत्रुर्हि निश्चितमस्ति । उद्यमेनोद्योगेन समः सदृशो बन्धुर्नास्ति । तमुद्यमं कुर्वाणः पुरुषो नावसीदति । दारिद्र्यादि दुःखं न प्राप्नोतीत्यर्थः । अनुष्टुब् वृत्तम् ॥

वृक्षादिवदापद आगमापायित्वात्तया सन्तो न सन्तप्यन्त इत्याह—

छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः ।
इति विमृशन्तः सन्तः सन्तप्यन्ते न ते विपदा ॥ ८७ ॥

छिन्नोऽपीति ॥ तरुर्वृक्षश्छिन्नोऽपि पुना रोहति प्रादुर्भूतो भवति, तथा क्षीणोऽपि क्षीणकलोऽपि चन्द्रः पुनरुपचीयते वृद्धिं प्राप्नोति, इत्यनेन प्रकारेणापद आगमापायित्वं विमृशन्तो विचारयन्तस्ते प्रसिद्धाः सन्तः साधवो विपदा आपदा न संतप्यन्ते दुःखं न प्राप्नुवन्तीति । आर्या वृत्तम् ॥

दैवे प्रतिकूले सति पौरुषं निरर्थकं भवतीतीन्द्रदृष्टान्तपूर्वकं दैवस्य श्रेष्ठ्यमाह—

नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः किल हरेरैरावतो वारणः ।
इत्यैश्वर्यबलान्वितोऽपि बलभिद्भग्नः परैः संगरे
तद्युक्तं ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम् ॥ ८८ ॥

नेतेति ॥ बृहस्पतिर्गुरुर्यस्येन्द्रस्य नेता । नायकोऽस्तीति शेषः । एवमुत्तरत्रापि बोध्यम् । प्रहरणमायुधं वज्रं कुलिशम्, सुरा देवाः सेनायां समवेताः सैनिकाः, दुर्गं स्वर्गः, हरेर्विष्णोरनुग्रहः कृपा, किलेति प्रसिद्धम् । वारणो हस्ती ऐरावतः, इति पूर्वोक्तप्रकारेण ऐश्वर्यं च बलं च ताभ्यामन्वितोऽपि बलभिदिन्द्रः । "मघवा" इत्यपि पाठः । संगरे सङ्ग्रामे परैः शत्रुभिः भग्नः, तत्तस्मात् ननु निश्चितं दैवमेव शरणं रक्षितृ इति युक्तम् । "व्यक्तम्" इति पाठे स्पष्टमित्यर्थः । तस्माद्वृथा दैवहीनं पौरुषं पुरुषप्रयत्नं धिग्धिगिति । दैवहीनः पुरुषप्रयत्नो निष्फल इत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥

सर्वफलस्य कर्माधीनत्वेऽपि सुधीभिर्यत्कर्तव्यं तद्विचारपूर्वकमेव कर्तव्यमिति बोधयन्नाह—

कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ।
तथाऽपि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ८९ ॥

कर्मायत्तमिति ॥ यद्यपि पुंसां फलं सुखदुःखादिकं कर्मायत्तं कर्माधीनमस्ति । यादृशं कर्म तादृशं सुखदुःखादिकं भवतीति भावः । सती असती वा बुद्धिः कर्मानुसरत्यनुगच्छतीति कर्मानुसारिण्यस्ति, तथाऽपि सुधिया सुष्ठु विचार्यैव कर्म कुर्वता भाव्यम् । बुद्धिमता पुरुषेण यद्यत्कर्म कर्तव्यं तत्तद्विचारपूर्वकमेव कर्तव्यमित्यर्थः । अनुष्टुब् वृत्तम् ॥

भाग्यहीनः पुरुषो यत्रकुत्राऽपि गतो दुःखमेव लभत इति खल्वाटदृष्टान्तेनाह—

खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके
वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः ।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥ ९० ॥

खल्वाट इति ॥ प्रायो बाहुल्येन यत्र प्रदेशे भाग्यहीनो भाग्यहीनः पु-

रुपो गच्छति तत्र तं प्रत्यापदो विपत्तयो यान्ति आगच्छन्ति। "तत्रापदां भाजनम्" इति पाठे आपदां विपत्तीनां भाजनं पात्रं भवतीत्यर्थः। तदेव दृष्टान्तेनोपपादयति। खल्वाटो निष्केशशिराः पुरुषो बहिरटन् दिवसेश्वरस्य सूर्यस्य किरणैर्मस्तके शिरसि सन्तापितः सन् अनातपमुष्णरहितं देशं वाञ्छन्निच्छन्विधिवशाद्दैववशात्तालस्य तालवृक्षस्य मूलं गतः। तत्राऽपि तस्मिंस्थलेऽपि प्रारब्धवशादकस्मात्पतता महाफलेनास्य खल्वाटस्य शिरः सशब्दं यथा स्यात्तथा भग्नमभूदिति शेषः। "तत्राप्याशु" इति पाठे शीघ्रमित्यर्थः। यथा सूर्यकिरणसंतप्तः खल्वाटः छायाप्रदेशे गतोऽपि तालफलेन भग्नशिरा अभवत्तथा भाग्यहीनः पुरुषः यत्रकुत्रापि गतो दुःखमेव लभत इति भावः। शार्दूलविक्रीडितं वृत्तम्॥

सर्वत्र दैवमेव बलीय इति सदृष्टान्तमाह—

गजभुजङ्गमयोरपि बन्धनं शशिदिवाकरयोर्ग्रहपीडनम्।
मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ९१

गजभुङ्गमेति॥ गजो हस्ती, भुजङ्गमः सर्पः, तयोरपि बन्धनं भवति। शशी चन्द्रः, दिवाकरः सूर्यस्तयोर्ग्रहेण राहुणा पीडनम्। मतिमतां बुद्धिमतां दरिद्रतां दारिद्र्यं विलोक्य दृष्ट्वा विधिर्दैवं बलवान्बलिष्ठोऽस्तीति मे मतिर्निश्चयोऽस्ति। अहो इति वितर्के। द्रुतविलम्बितं वृत्तम्। "द्रुतविलम्बितमाह नभौ भरौ" इति तल्लक्षणात्॥

उत्तमपुरुषाणामपि लोकेऽल्पायुष्ट्वं दृष्ट्वा तान्सृजतो ब्रह्मणोऽपि विचारशून्यत्वं दर्शयन्नाह—

सृजति तावदशेषगुणाकरं पुरुषरत्नमलङ्करणं भुवः।
तदपि तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता विधेः॥ ९२॥

सृजतीति॥ तावदादौ ब्रह्मा अशेषा ये गुणास्तेषामाकरं खनिः। अशेषगुणपरिपूर्णमित्यर्थः। भुवोलङ्करणं शोभाकरं पुरुषरत्नं सृजति सृष्ट्वा च तदपि पुरुषरत्नमपि तत्क्षणभङ्गि तत्क्षणनाशशीलं अल्पायुः करोति चेत्। अहह इति खेदे। कष्टं यथा स्यात्तथा इयं विधेर्ब्रह्मणोऽपण्डितस्य भावोऽपण्डितताऽज्ञानिताऽस्ति। पूर्वोक्तमेव वृत्तम्॥

जन्मकाले विधिना ललाटलिखितस्यान्यथा करणे कोऽपि न समर्थ इति करीरादिदृष्टान्तेनाह—

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम्।

धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः ॥ ९३ ॥

पत्रमिति ॥ करीरसंज्ञको भाषायां (नेवती) इति प्रसिद्धो यो विटपो वृक्षस्तस्मिन् यदा यदि पत्रं पर्णं नैव भवति तर्ह्ययं वसन्तस्याखिलवृक्षपत्रकुसुमादिप्रदस्य वसन्तर्तोर्दोषोऽपराधः किम्। नास्तीत्यर्थः। यदि उलूको (घुवट) इति प्रसिद्धः पक्षिविशेषो दिवाऽपि दिवसेऽपि नावलोकते इदं सूर्यस्य दूषणं किम्। तथा धारा जलधाराश्चातकस्य पक्षिविशेषस्य मुखे नैव पतन्ति तर्हि मेघस्य सर्वतो वृष्टिकरस्य जलदस्य दूषणं किम्। किं तु पूर्वं यद्विधिना ब्रह्मणा जन्मकाले ललाटे लिखितं तन्मार्जितुं दूरीकर्तुं कः क्षमः समर्थः। न कोऽपीत्यर्थः। वसन्तादीनां पत्रसमृद्ध्यादिसाधकत्वेऽपि करीरादिषु पत्राद्यभावे दैवातिरिक्तं कारणं नास्ति। तस्माद्दैवमेव सर्वत्र प्रबलमिति भावः। शार्दूलविक्रीडितं वृत्तम् ॥

प्राचीनं कर्म प्रशंसति द्वाभ्याम्—

नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः।
फलं कर्मायत्तं किममरगणैः किंच विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ ९४ ॥

नमस्याम इति ॥ वयं देवान्नमस्यामः। उपपदविभक्तेः कारकविभक्तिर्बलीयस्त्वाद्द्वितीया। ननु निश्चितं तेऽपि देवा अपि हतो नष्टो यो विधिर्ब्रह्मा तस्य वशगा अधीनाः सन्ति। विधिर्ब्रह्मा वन्द्योऽस्ति सोऽपि प्रतिनियतं शास्त्रनियमितं यत्कर्म तस्यैकं मुख्यं फलं ददातीति। तथाविधकर्मानुरोधि फलदातेत्यर्थः। फलमपि कर्मण आयत्तमाधीनमस्ति तर्हि अमरगणैर्देवैः किं, विधिना च किम्। न किमपीत्यर्थः। विधिरपि येभ्यः कर्मभ्यो न प्रभवति न पर्याप्तो भवति। कर्माणि परावर्तयितुं विधिरपि समर्थो न भवतीत्यर्थः। "नमः स्वस्ति–" इत्यत्रालमिति पर्यायग्रहणाच्चतुर्थी। तस्मात्सर्वापेक्षया कर्मैव प्रबलमिति तात्पर्यम्। शिखरिणी वृत्तम् ॥

किंच—

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ ९५ ॥

ब्रह्मेति ॥ येन कर्मणा ब्रह्माण्डमेव भाण्डं भाजनं तस्योदरे मध्ये ब्रह्मा कुलालवत्कुम्भकारवन्नियमितो नियन्त्रितः। जगन्निर्माणकार्यनिर्णय इत्यर्थः। यथा कुम्भकारो नानाविधघटरचनां करोति तथा ब्रह्मापि नानाविधसृष्टिरचनां करोतीत्यर्थः। एवमुत्तरत्रापि बोध्यम्। येन विष्णुर्दशदशाधावतारा मत्स्यादिजन्मानि तद्रूपं गहनं दुःखं यस्मिंस्तथाविधे महासंकटे क्षिप्तः पातितः। प्रेरित इति यावत्। "गहनं कलिले त्रिषु। नपुंसकं गह्वरे स्याद्दुःखकाननयोरपि" इति मेदिनी। तथा येन कर्मणा रुद्रः शिवः कपालं नरकपालं तेन युक्तो यः पाणिपुटको हस्तसंपुटकस्तस्मिन्या भिक्षा तदर्थे भ्रमणं कारितः। भिक्षाया आधारस्यावश्यकत्वात्तत्सापेक्षितत्वेन देवदत्तस्य गुरुकुलमित्यादिवत्समासः। तथा सूर्यो नित्यमेव गगन आकाशे भ्राम्यति भ्रमणं करोति तस्मै कर्मणे नमोऽस्तु। शार्दूलविक्रीडितं वृत्तम् ॥

भाग्यमेव सर्वत्र समये समये फलति नाकृत्यादय इति वृक्षदृष्टान्तपूर्वकमाह—

नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा।
भाग्यानि पूर्वतपसा खलु संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ९६ ॥

नैवेति ॥ *आकृतिः स्वरूपं नैव फलति। उत्तमाप्याकृतिरिष्टफलं न जनयतीत्यर्थः*। एवमेव सर्वत्रोहनीयम्। कुलं सत्कुलं नैव, शीलं सद्वृत्तं नैव, विद्यापि शास्त्राभ्यासोऽपि नैव, यत्नेन प्रयत्नेन कृतापि सेवा शुश्रूषा न, किंतु पूर्वमाचरितं यत्तपस्तेन संचितानि पुरुषस्य भाग्यानि काले समये फलन्ति। खलु निश्चयेन। अत्र दृष्टान्तः। यथा वृक्षाः काले समय एव फलन्ति नान्यत्र तद्वत्। तस्माद्भाग्यमेव सर्वत्र फलदायकं नान्यदिति भावः। वसन्ततिलका वृत्तम् ॥

पूर्वसंचितपुण्यानि सर्वत्र पुरुषं रक्षन्तीत्याह—

वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुरा कृतानि ॥ ९७ ॥

वन इति ॥ पुरा पूर्वं कृतानि पुण्यानि सुकृतानि वनेऽरण्ये, रणे संग्रामे, शत्रवश्च जलं चाग्निश्च तेषां मध्ये, महार्णवे महासमुद्रे, पर्वतस्य मस्तके शिखरे वा, "पर्वतसंकटे" इति पाठे पर्वते संकटे चेत्यर्थः। सुप्तं निद्रितं,

प्रमत्तं मद्यादिना, विषमे निम्नोन्नतभूमौ स्थितं पुरुषं रक्षन्ति । तस्मात्पुण्यमेव सदा नरैः कार्यमिति भावः । उपेन्द्रवज्रा वृत्तम् ॥

सत्क्रियैव पुरुषेण कर्तव्येति तत्फलप्रदर्शनपूर्वकमाह—

या साधूंश्च खलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥ ९८ ॥

या साधूंश्चेति ॥ या सत्क्रिया खलान् दुर्जनान् साधून्सज्जनान्करोति, मूर्खान्विदुषः पण्डितान्करोति, द्वेषिणः शत्रून् हितान् हितकरान् करोति, परोक्षं प्रत्यक्षं कुरुते, हालाहलं विषविशेषं अमृतं तत्क्षणात्क्षणमात्रेण करोति, तस्माद्धे साधो वाञ्छितमिच्छितं फलं भोक्तुं भगवतीमैश्वर्यवतीं तां सत्क्रियामाराधय, विपुलेषु गुणेषु व्यसनैरासक्तिभिरास्थां यत्नं मा कृथा मा कुरु । "आस्थानीयत्नयोरास्था" इत्यमरः । एतादृशीं सत्क्रियां विहाय गुणास्थया तद्विरुद्धो यत्नः पुरुषेण न कार्य इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥

धीमता पुरुषेण यद्यत्कार्यं कर्तव्यं तस्य परिणामपर्यन्तं विचारं कृत्वा तत्कर्तव्यमित्याह—

गुणवदगुणवद्वा कुर्वता कार्यमादौ
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ९९ ॥

गुणवदिति ॥ आदौ प्रथमं गुणा विद्यन्ते यस्मिंस्तद्गुणवत् वा अथवा अगुणवत्तद्रहितं कार्यं कुर्वता पण्डितेन यत्नतः परिणतिः परिणामोऽवधार्या विचार्या । प्रथममेवारभ्यमाणस्य कर्मणः परिणामे सुखदत्वं दुःखदत्वं वेति विचारणीयमित्यर्थः । विपक्षे बाधकमाह—अतिरभसेनाविचारतया कृतानां कर्मणां विपाकः परिणाम आविपत्तेर्मरणपर्यन्तं हृदयं दहतीति हृदयदाही शल्येन शङ्कुना तुल्यः । "वा पुंसि शल्यं शङ्कुर्ना" इत्यमरः । बाणाग्रवदत्यन्तदुःखदायीति यावत् । भवतीति । मालिनी वृत्तम् । लक्षणं पूर्वमुक्तमेव ॥

एतस्यां कर्मभूमौ जन्म प्राप्य पुरुषेण तप एव कर्तव्यं नान्यद्विनिर्भर-

कृत्वा कर्पूरखण्डान्वृतिमिह कुरुते कोद्रवाणां समन्ता-
त्प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः ॥ १००॥

स्थाल्यामिति ॥ यो मनुजो मनुष्य इमां कर्मभूमिं सदाचरणं कर्तुं योग्यां भूमिं प्राप्य तपः कृच्छ्रचान्द्रायणादि न चरति न करोति स मन्दभाग्यो भाग्यहीनः पुरुषो वैदूर्यप्रचुरा वैदूर्यमयी तस्यां स्थाल्यां पाकभाजने इन्धनेष्वाद्यानि मुख्यानि तैश्चन्दनैस्तिलकणान्पचति विक्लेदयति, तिलकणपाचनार्थं स्थालीचन्दनादिसंपादनं यथा व्यर्थं तद्वदन्यत्कर्म करोतीत्यर्थः । तथार्कमूलस्यार्कवृक्षमूलस्य हेतोः सुवर्णस्येमानि सौवर्णानि तैर्लाङ्गलाग्रैर्हलाग्रैर्वसुधां पृथ्वीं विलिखति कर्षति । अर्कमूलसंपादनार्थं स्वर्णलाङ्गलेन भूमिखननं यथा व्यर्थं तद्वदित्यर्थः । तथा कर्पूरखण्डान्कर्पूरवृक्षशकलानि कृत्वा कोद्रवाणां कोरदूषकाणां (हरीक) इति ख्यातानां आसमन्तात् वृतिमावरणमिह कुरुते । कोद्रवरक्षणार्थं कर्पूरवृक्षच्छेदनं यथा व्यर्थं तद्वदित्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥

सर्वस्य कर्माधीनत्वात्कृतेऽपि महति यत्ने यदवश्यं भावि तद्भवत्येवेत्याह—

मज्जत्वम्भसि यातु मेरुशिखरं शत्रुञ्जयत्वाहवे
वाणिज्यं कृषिसेवनादि सकला विद्याः कलाः शिक्षताम् ।
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं महा-
न्नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ १०१ ॥

मज्जत्विति ॥ महान्पुरुषोऽम्भसि जले मज्जतु, मेरोः शृङ्गं यातु, आहवे सङ्ग्रामे शत्रून् जयतु, वणिजः कर्म वाणिज्यम्, कृषिसेवनमादिर्यासां ताश्च सकला विद्याः कलाश्च शिक्षताम्, प्रयत्नं कृत्वा खगवत्पक्षिवद्विपुलं विस्तीर्णमाकाशं प्रयातु, तथापि भवितुं योग्यं भाव्यं न भाव्यमभाव्यं भवनानर्हं इह लोके कर्मवशतः कर्माधीनत्वात् न भवति । भाव्यस्य भवितुं योग्यस्य नाशः कुतः स्यात् । न कुतश्चिदित्यर्थः । तदुक्तम् । "यदभावि न तद्भावि भावि चेन्न तदन्यथा" इति । शार्दूलविक्रीडितं वृत्तम् ॥

प्राचीनकर्मवशात्सर्वमघटमानमपि सिद्ध्यतीत्याह—

भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनाः सुजनतामुपयान्ति तस्य ।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ १०२ ॥

भीममिति ॥ यस्य नरस्य पुरुषस्य विपुलं बहु पूर्वसुकृतं पूर्वपुण्यमस्ति तस्य भीमं भयंकरमपि वनमरण्यं प्रधानं श्रेष्ठं पुरं नगरं भवति । तथा सर्वे जना लोकास्तस्य सुजनस्य भावः सुजनता तां सौजन्यमुपयान्ति प्राप्नुवन्ति । तद्विषये सौजन्यवन्तो भवन्तीत्यर्थः । तथा कृत्स्ना संपूर्णा भूः पृथ्वी सन्त उत्तमा निधयः रत्नानि च तैः पूर्णा परिपूर्णा भवति । पूर्वकर्मानुकूल्ये वसुधान्वर्था सती यत्रकुत्रापि निध्यादिकं ददातीत्यर्थः । तस्मात्पुरुषेण पुण्यकर्मैव कर्तव्यमिति तात्पर्यम् । वसन्ततिलका वृत्तम् ॥

पुरुषस्य कर्तव्याकर्तव्ये प्रश्नोत्तराभ्यामाह—

को लाभो गुणिसंगमः किमसुखं प्राज्ञेतरैः संगतिः
का हानिः समयच्युतिर्निपुणता का धर्मतत्त्वे रतिः।
कः शूरो विजितेन्द्रियः प्रियतमा कानुव्रता किं धनं
विद्या किं सुखमप्रवासगमनं राज्यं किमाज्ञाफलम् ॥ १०३ ॥

को लाभ इति ॥ लाभोऽभीष्टप्राप्तिः कः ? गुणिनां गुणिपुरुषाणां संगमः संगतिः । पुरुषेण गुणवद्भिरेव संगः कर्तव्य इत्यर्थः । असुखं दुःखं किम् ? प्राज्ञेभ्य इतरैर्मूर्खैः संगतिः । पुरुषेण मूर्खैः सह संगतिः कदापि न कार्येत्यर्थः । हानिः का ? समयस्य यस्मिन्काले यदवश्यं कर्तव्यं तस्य कालस्य च्युतिरतिवाहनम् । पुरुषेण समये समये दत्तावधानेन भाव्यमित्यर्थः । निपुणता का ? धर्मस्य तत्त्वे रहस्ये रतिः प्रीतिः । सर्वदा पुरुषेण धर्माचरणमेव कर्तव्यं नाधर्माचरणमित्यर्थः । शूरः कः ? विजितानीन्द्रियाणि येन स तथाविधः । पुरुषेण जितेन्द्रियेण भाव्यमित्यर्थः । प्रियतमा अतिप्रिया स्त्री का ? अनु पत्यनुरोध एव व्रतं नियमो यस्याः सा । स्वानुकूलायाः स्त्रियः संग्रहः कर्तव्यो नाननुकूलाया इत्यर्थः । धनं किम् ? विद्या शास्त्राद्यभ्यासः । पुरुषेण सदा शास्त्राभ्यास एव कर्तव्य इत्यर्थः । सुखं किम् ? अप्रवासगमनं प्रवासगमनाभावः । प्रवासगमनं यथा न स्यात्तथा पुरुषेण स्थेयमित्यर्थः । राज्यं किम् ? आज्ञैव फलं लाभो यस्य तदेव । येन राज्येनाज्ञा सफला भवेत्तादृशं राज्यं कर्तव्यमित्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥

विवेकिपुरुषस्य द्वे गती भवत इति मालतीकुसुमदृष्टान्तपूर्वकमाह—

मालतीकुसुमस्येव द्वे गती इह मनस्विनः ।
मूर्ध्नि सर्वस्य लोकस्य शीर्यते वन एव वा ॥ १०४ ॥

मालतीति । मालत्या जातिलतायाः कुसुमं पुष्पं तस्येव मनस्विनो विवे-

किनः पुरुषस्य द्वे गती दशे "गतिः स्त्री मार्गदशयोः" इति मेदिनी। भवतः। ह स्फुटम्। कथम्। यथा तेन कुसुमेन सर्वलोकस्य मूर्ध्नि मस्तके स्थीयते, वा अथवा वनेऽरण्य एव शीर्यते शीर्णं भूयते तद्वन्मनस्विनो गृहे लोकमान्या वने अरण्यवासिनो वा भवन्तीत्यर्थः। अनुष्टुब् वृत्तम् ॥

पृथिव्यां सुजनस्थितेर्दौर्लभ्यमाह—

अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः।
परपरिवादनिवृत्तैः क्वचित्क्वचिन्मण्डिता वसुधा ॥ १०५ ॥

अप्रियेति ॥ न प्रियाणि मनःसंतोषकराणि च तानि वचनानि तैर्दरिद्रा हीनास्तैः, प्रियवचनैर्हितकारकवचनैराढ्याः पूर्णास्तैः, स्वदाराभिः स्वकीयस्त्रियैव परितुष्टाः संतुष्टास्तैः, परेषां परिवादो निन्दा तस्याः सकाशान्निवृत्ताः, पराङ्मुखास्तैः, एतादृशैः पुरुषैर्वसुधा पृथ्वी क्वचित्क्वचिन्मण्डितालङ्कृतास्ति। एवंविधाः पुरुषास्त्वतिदुर्लभा इति भावः। आर्या वृत्तम् ॥

धैर्यावलम्बिनः पुरुषस्य धैर्यं नाशयितुं कोऽपि न शक्नोतीत्यग्निदृष्टान्तपूर्वकमाह—

कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणः प्रमार्ष्टुम्।
अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखा याति कदाचिदेव॥१०६॥

कदर्थितस्येति ॥ कदर्थितस्याप्यतिदुःखितस्यापि धैर्येण धीरतया वृत्तिर्वर्तनं यस्य तस्य धैर्यावलम्बिनः पुरुषस्य धैर्यरूपो यो गुणस्तं प्रमार्ष्टुं नाशयितुं कैरपि न शक्यते। तत्र दृष्टान्तमाह—अधोमुखस्येति। अधोमुखं यस्य तस्य कृतस्य। अधोमुखीकृतस्येति यावत्। वह्नेरग्नेः शिखा ज्वाला कदाचिदेव कदाप्यधो न याति किंतूर्ध्वमेव गच्छति। तस्माद्धीरो जनो दुःखितोऽपि धैर्यं न त्यजतीति भावः। उपजातिर्वृत्तम् ॥

धीरः पुरुषः सर्वं जगद्वशीकरोतीत्याह—

कान्ताकटाक्षविशिखा न लुनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः।
कर्षन्ति भूरिविषयाश्च न लोभपाशै-
र्लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥ १०७ ॥

कान्ताकटाक्षेति ॥ यस्य पुरुषस्य चित्तमन्तःकरणं कान्तायाः स्त्रियाः कटाक्षा अपाङ्गदर्शनानि तान्येव विशिखा बाणास्ते न लुनन्ति छिन्दन्ति। तथा यस्य चित्तं कोपः क्रोध एव कृशानुरग्निस्तस्य तापः संतापो न निर्द-

इति भस्मीकरोति । तथा भूरि बहवो विषया लोभ एव पाशा बन्धनानि धैर्यस्य चित्तं न कर्षन्त्याकर्षन्ति स धीरो जनः कृत्स्नं सर्वमिदं लोकत्रयं जयति वशीकरोति । अनेन कामादयः पुरुषेण त्याज्या इति सूचितम् । वसन्ततिलका वृत्तम् ॥

एक एव शूरः पुरुषः सर्वं जगज्जयतीति सूर्यदृष्टान्तपूर्वकं दर्शयति—

एकेनापि हि शूरेण पादाक्रान्तं महीतलम् ।
क्रियते भास्करेणेव स्फारस्फुरिततेजसा ॥ १०८ ॥

एकेनेति ॥ स्फारं विस्तीर्णं स्फुरितं देदीप्यमानं तेजो यस्य तेन भास्करेण सूर्येणैवैकेनाद्वितीयेन शूरेण वीरपुरुषेण महीतलं पृथ्वीतलं पादेन चरणेन पक्षे पादैः किरणैश्चाक्रान्तं व्याप्तं क्रियते । यथा सूर्यः स्वपादैः सर्वं जगद्व्याप्तं करोति तथा शूरः पुरुषः स्वपादेनाक्रान्तं करोतीति भावः । अनुष्टुब् वृत्तम् ॥

लोकवल्लभशीलवतः पुरुषस्य सर्वेऽप्यनुकूला भवन्तीत्याह—

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
न्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ १०९ ॥

वह्निरिति ॥ यस्य पुरुषस्याङ्गे शरीरे अखिललोकानां वल्लभतममतिशयेन प्रियं शीलं सद्वर्तनं समुन्मील्त्युज्जृम्भते, तस्य वह्निरग्निरुष्णस्वभावोऽपि जलायते जलमिवाचरति । जलवच्छीतलो भवतीत्यर्थः । "कर्तुः क्यङ् सलोपश्च" इत्याचारार्थे क्यङ् । एवमुत्तरत्रापि बोध्यम् । तथा जलनिधिः समुद्रो दुष्पारोऽपि कुल्यायते कुल्याल्पा सरित्तद्वदाचरति । दुस्तरोऽपि सुतरो भवतीत्यर्थः । तत्क्षणात्क्षणमात्रान्मेरुर्मेरुपर्वतः स्वल्पशिलायते सुष्ठु अल्पा या शिला तद्वदाचरति । महानपि पर्वतः स्वल्पपाषाणतुल्यो भवतीत्यर्थः । मृगपतिः सिंहोऽतिक्रूरोऽपि सद्यः कुरङ्गायते कुरङ्गो हरिणस्तद्वदाचरति । क्रौर्यं त्यजतीत्यर्थः । सर्पोऽतिक्रूरोऽपि माल्यगुणायते माल्यगुण इवाचरति । स्वक्रौर्यं त्यजतीत्यर्थः । विषरसः पीयूषवर्षायते पीयूषरसोऽमृतरसस्तस्य वर्षो वर्षणं तद्वदाचरति । स्वीयं मारकं गुणं त्यजतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥

तेजस्विनः पुरुषाः स्वीयां प्रतिज्ञां न त्यजन्तीति स्वजननीदृष्टान्तपूर्वकमाह—

लज्जागुणौघजननीं जननीमिव स्वा-
मत्यन्तशुद्धहृदयामनुवर्तमानाम् ।

तेजस्विनः सुखमसूनपि संत्यजन्ति
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् ॥ ११० ॥

इति श्रीमद्राजर्षिप्रवरभर्तृहरिकृतं नीतिशतकं संपूर्णम् ॥

लज्जेति ॥ सत्यमेव व्रतं तस्मिन्व्यसनमासक्तिर्येषां ते एवंविधास्तेजस्विनः प्रभाववन्तः पुरुषाः सुखं यथा स्यात्तथा असून् प्राणानपि त्यजन्ति । पुनः स्वां स्वकीयां जननीं मातरमिव प्रतिज्ञां न त्यजन्ति । कीदृशीं प्रतिज्ञां मातरं च । असत्कर्मणि प्रवृत्तिलक्षणलज्जारूपो यो गुणौघो गुणप्रवाहस्तस्य जननीमुत्पादिकाम् । पुनः कीदृशीम् । अत्यन्तं शुद्धं हृदयमन्तःकरणं यस्यां यस्या वा ताम् । पुनः कीदृशीम् । अनुवर्तमानां अनुलक्षेण वर्तमानाम् । अनेन सत्यभाषिणा पुंसा प्राणा अपि त्याज्याः परंतु स्वीयप्रतिज्ञा न त्याज्येति सूचितम् । वसन्ततिलका वृत्तम् ॥

नीत्याख्यशतकव्याख्यामर्थद्योतनिकाभिधाम् ।
कृष्णोऽहं कृतवांस्तेन प्रीयतां विश्वसृड्विधिः ॥ १ ॥

इति कृष्णसूरिविरचितायामर्थद्योतनिकाभिधायां टीकायां नीतिशतकं संपूर्णम् ॥

	कि.	ट. ख.
सकृत, मल्लिनाथकृत संजीविनी टीकेसहित	।≈	०-
,, इंग्रजी टीपांसहित … … …	।॥।	०-॥
यमुनाष्टक-शंकराचार्यकृत … … …	०।	०॥
रघुवंश काव्य-कालिदासकृत, मल्लिनाथकृत संजीविनी टीकेसहित	१॥	०≡॥
,, (सूक्ष्माक्षर) …	।॥।	०=
रत्नसमुच्चय … …	०=	०॥
रत्नावली नाटिका-श्रीहर्षदेवकृत… … …	।=	०-
,, इंग्रजी टीपांसहित … … …	।॥	०-
रसिकाष्टक काव्य-नारायणभट्ट पर्वणीकरकृत	०॥	०॥
रामगीता व रामगीतामाहात्म्य … …	०॥।	०॥
रामचंद्रिका (गुंजीकरकृत संस्कृत शब्दरूपावलि)… … …	।	०॥
रामरक्षास्तोत्र … …	०॥	०॥
रामस्तवराजस्तोत्र …	०-	०॥
रामायण-वाल्मीकिकृत, रामकृत तिलकटीकेसहित … … …	८	।॥=
रुद्र… … … …	०॥।	०॥
लघुकौमुदी-वरदराजकृत … … …	०≡	०-
लघुयोगवासिष्ठ, आत्मसुखकृत वासिष्ठचंद्रिका टीकेसहित …	५	।॥
लक्ष्मीस्तोत्र-अगस्त्यकृत	०॥	०॥
वेदांतसार-हें नृसिंहसरस्वति स्वामिकृत सुबोधिनी टीका व रामतीर्थविरचित विद्वन्मनो-		

	कि.	ट. ख.
रंजनी टीका या दोन टीकांसहित कर्नल जे. ई. जेकब यांनीं पाठांतरें व इंग्लिश नोट्स देऊन तपासलें आहे.	१॥	०=॥
विक्रमोर्वशी नाटक-कालिदासकृत, रंगनाथकृत प्रकाशिका टीकेसहित… … …	।॥।	०-
विदुरनीति, सटीक …	।=	०॥
श्रीविष्णोर्नामसहस्रम्	।=	०-
विष्णुसहस्रनाम (सा.)	०-	०॥
,, (रेशमी पुट्ठा)…	०=॥	०॥
,, मोठ्या अक्षरांचें (सा.)	०-॥	०॥
विष्णुसहस्रनामावलि…	०-।	०॥
,, (रेशमी पु०) …	०=॥	०॥
वृत्तरत्नाकर-केदारभट्टकृत, नारायणपण्डितकृत टीकेसहित, श्रुतबोध-कालिदासकृत, व छन्दोमञ्जरी-गङ्गादासकृत… …	।॥।	०-
वैदिककोश-भट्टभास्करकृत, निघंटु व चार परिशिष्टें यांसुद्धां …	।॥	०-
वैराग्यशतक-भर्तृहरिकृत, कृष्णशास्त्री महाबलकृत टीकेसहित	।।॥	०॥
शब्दरूपावलि (गुंजीकरकृत)… … …	०-	०॥
शिवसहस्रनामावलि (साधी) … …	०-॥	०॥
,, (रेशमी पुट्ठा)	०≡	०॥
शिवकवच … …	०॥।	०॥
शुक्लयजुर्वेदीयरुद्राष्टाध्यायी (स्थूलाक्षर)	०≡	०॥
शिवगीता (साधी) …	।।।	०-
शिवगीता (रेश० पु०)	।=।	०-

	किं.	ट. ख.
,, लक्ष्मीनरहरिसूनुकृत बालानंदिनी टीका व शंकराचार्यकृत कालभैरवाष्टक यांसहित	१	०=
शिवतांडवस्तोत्र-दशकंठकृत, माधवानंदकृत टीकेसहित	०—	०॥
शिवमहिम्नस्तोत्र-पुष्पदंतकृत	०।॥	०॥
शिवापराधक्षमापनस्तोत्र-शंकराचार्यकृत	०॥	०॥
शिशुपालवध काव्य-माघकृत, मल्लिनाथकृत सर्वंकषा टीकेसहित	३	।—
शितलाष्टक	०।	०॥
शृङ्गारशतक-भर्तृहरिकृत, कृष्णशास्त्री महाबलकृत टीकेसहित	०≡॥	०॥
सत्यनारायण पूजा व कथा	०—	०॥
सारस्वतव्याकरणपूर्वार्ध (कापडी बाइंडिंग)	।—	०—
सप्तशती (चंडीपाठ), देवीसूक्त व तीन रहस्यें यांसहित (स्थूलाक्षर रेशमी पुठ्ठा)	॥।	०=॥
सप्तशती (रे. पु. म. अ.)	।—	०—
,, (साधी कागदी)	०≡	०—
,, (मध्यमाक्षर सुटी प्रत)	०=	०—
,, (सूक्ष्माक्षर रे. पु.)	।।	०॥
,, (स्थूलाक्षर सुटी प्रत)	॥=	०=
समयोचितपद्यमालिका	।=	०—
समासचक्र	०।॥	०॥
सर्पपूजा	०—	०॥
सिद्धांतकौमुदी-भट्टोजीदीक्षितकृत, अष्टाध्यायीसूत्रपाठ, गणपाठ, धातुपाठ, लिंगानुशासन व शिक्षा आणि सूत्रानुक्रमणी यांसहित	२	।—
सुभाषितरत्नभांडागार	३॥	।=
सूर्यसहस्रनामावलि ...	०—॥	०॥
,, (रे. पुठ्ठा) ...	०≡	०॥
सौर	०॥	०॥
स्वानुभवाष्टक-गोपीनाथ दाधीचकृत, स्वकृत सारबोधिनी टीकेसहित	०—	०॥
स्वात्मनिरूपण	।।	०॥
हर्षचरित-बाणभट्टकृत, शंकरकृत संकेतटीकेसहित...	२	०=
हितोपदेश-नारायणपंडितकृत	॥।	०—
(इंग्रजी टीपांसहित)	१	०—॥
हिरण्यकेशीय (आपस्तंबीय) नित्यविधि	०≡	०—

नामलिंगानुशासन.

(अमरकोश.)

हें पुस्तक आजपर्यंत बहुतेकांनीं सटीक व मूळ असें छापून प्रसिद्ध केलें व करीतही आहेत, त्यावरून, केवळ याचें नांव ऐकून लोकांस महत्त्व वाटणार नाहीं, परंतु हें तसें नसून केवळ मूळ मात्रच आहे खरें, तथापि याच्या प्रतिश्लोकांत येणारीं ज्या ज्या वस्तूंचीं नांवें असतील तीं दरदृष्टांत त्या त्या ओळीच्या बाजूस मराठींत दिलीं आहेत. व कोणच्या वस्तूचीं किती हें समजण्याकरितां बाजूस अंकही दिला आहे. लवकर ध्यानांत येण्याकरितां विशेषनांवें तेवढीं जाड टेवून बाकी मजकूर बारीक

टैपांत देविला आहे व टिकटिकाणीं अधिक माहिती देणें ती पृष्टाच्या शेवटीं दिली आहे. ग्रंथाच्या शेवटीं संस्कृत मूळपदांचा व बाहेर दाखविलेल्या मराठी शब्दांचा अकारादिवर्णक्रमकोश जोडला आहे. या योगानें हें पुस्तक आबालवृद्धांला व विशेषतः अभ्यासी मुलांला उपयुक्त होईल अशी आशा आहे. हें वे. शा. सं. रा. रा. विनायक नारायण शास्त्री जोशी यांनीं तयार केलें आहे. किं. १ रु. ट. ख. ८३ आणे.

काव्यमाला.

या नांवाचें संस्कृत मासिक पुस्तक, सन १८८६ चे जान्युआरी महिन्यापासून प्रसिद्ध होत आहे. यांत उत्तम उत्तम प्राचीन संस्कृत काव्यें, नाटकें, चंपू, भाण, प्रहसनें, छंद, अलंकार इत्यादिकांचा यथावकाश संग्रह होत असतो. फार प्राचीन आणि अत्यंत सुरस असेच ग्रंथ निवडून ते या मालेंत गुंफले जातात. **महामहोपाध्याय पंडित दुर्गाप्रसाद** या नांवाचे विद्वान्, बहुश्रुत आणि शोधक गृहस्थ जयपूरच्या महाराजांचे आश्रयास होते. त्यांनीं काश्मीर, पंजाब, बंगाला, राजपुताना, मध्यदेश, तैलंगण, वगैरे सर्व प्रदेश फिरून नानाप्रकारचे काव्यग्रंथ संपादित केले होते. त्यांतील कित्येक ग्रंथ तर ८०० कियहुना १००० वर्षांच्याही पूर्वीचे होते. ते सर्व ग्रंथ **रा० रा० काशिनाथ पांडुरंग परब** यांनीं आद्यंत तपासून दिलेले या मालेंत येत जातात; ज्या ग्रंथांच्या टीका उपलब्ध आहेत, ते ग्रंथ सटीक छापले जातात. परंतु टीकारहित ग्रंथांतील दुर्बोध शब्दांवर टिप्पणी देण्यांत येते. शिवाय कवींचें वृत्त, काल व ग्रंथ इत्यादिकांविषयीं माहिती जागोजाग दिली जाते. या मालेचे अंक प्रतिमासास एकदां प्रसिद्ध होतात. प्रत्येक अंकांत डेमी अष्टपत्री सांच्याचीं १०० पृष्टें असतात. याची वर्षाची आगाऊ किंमत ६ रुपये, ट. ख. ।।।. फुटकळ अंकाची किं. ॥≈ ट. ख. ८≈

हें मासिक पुस्तक आज नऊ वर्षे एकसारखें नियत आहे.

हीं पुस्तकें मुंबईंत काळकादेवीच्या रस्त्यावर "निर्णयसागर" छापखान्यांत रोख पैसे पाठविले असतां अथवा व्हाल्युपेएबलद्वारां विकत मिळतील.

आमच्याकडे विक्रीस असलेलीं संस्कृत पुस्तकें.

	किंमत. रु.आ.	टपाल. आ.
१. आदिकविश्रीवाल्मीकिविरचित रामायण, रामकृत टीकेसहित.	८–०	१४
२. सोमदेवभट्टकृत कथासरित्सागर.	६–०	८
३. कालिदासकृत रघुवंश काव्य, मल्लिनाथकृत टीका व पाठान्तरें यासहित.	२–०	३॥
४. कालिदासकृत कुमारसंभव काव्य, मल्लिनाथकृत टीका (सर्ग १–८) व सीतारामकृत टीका (सर्ग ८–१७) व पाठान्तरें यासहित.	२–०	३॥
५. कालिदासकृत मेघदूत काव्य, मल्लिनाथकृत टीका, पाठान्तरें व अर्थप्रदर्शक इंग्रजी टिप्पणी यासहित.	०–१२	१
६. कालिदासकृत ऋतुसंहार काव्य, मणिरामकृत टीका, पाठान्तरें व अर्थप्रदर्शक इंग्रजी टिप्पणी, व शृङ्गारतिलक, यासहित.	०–६	१
७. कालिदासकृत अभिज्ञानशाकुन्तल नाटक, राघवभट्टकृत टीका, पाठान्तरें व अर्थप्रदर्शक इंग्रजी टिप्पणी यासहित. ...	२–०	२॥
८. कालिदासकृत विक्रमोर्वशीय नाटक, रङ्गनाथकृत टीकेसहित.	०–१२	२
९. कालिदासकृत मालविकाग्निमित्र नाटक, काटयवेमकृत टीका, व अर्थप्रदर्शक इंग्रजी टिप्पणी यासहित.	०–१२	२
१०. श्रीहर्षकृत रत्नावली नाटिका, अर्थप्रदर्शक इंग्रजी टिप्पणीसहित.	०–८	१॥
११. श्रीहर्षकृत प्रियदर्शिका नाटिका, अर्थप्रदर्शक इंग्रजी टिप्पणीसहित.	०–८	१॥
१२. बाणभट्टकृत कादम्बरी कथा, भानुचन्द्र व सिद्धचन्द्र यांच्या टीकांसहित.	५–०	८
१३. दण्डीकृत दशकुमारचरित कथा, पूर्वपीठिका व उत्तरपीठिका, पद्मनाभकृत उत्तरपीठिका, कवीन्द्रसरस्वती व शिवराम यांच्या दशकुमारचरितावरील टीका, व पूर्वपीठिकेवरील पददीपिका टीका व पाठान्तरें यांसहित.	१–८	४
१४. भारविकृत किरातार्जुनीय काव्य, मल्लिनाथकृत टीका व पाठान्तरें यासहित.	२–०	४
१५ माघकृत शिशुपालवध काव्य, मल्लिनाथकृत टीका व पाठान्तरें यासहित.	३–०	६
१६. भट्टिकविकृत भट्टिकाव्य, जयमङ्गलकृत टीकेसहित ...	३–०	४
१७ नारायणपण्डितकृत हितोपदेश, अर्थप्रदर्शक इंग्रजी टिप्पणीसहित.	१–०	२
१८. अन्नंभट्टकृत तर्कसंग्रह व दीपिका, इंग्रजी भाषांतरासहित.	०–६	१
१९. लौगाक्षिभास्करकृत तर्ककौमुदी	०–२	॥
२०. सुभाषितरत्नभाण्डागार.	३–८	५